ननु प्रजहाति यदा कामान् इंद्रियाणींद्रियार्थेभ्यो निगृहीतानीत्यादिना उ सक्तविषयाणां प्रहाणं तेभ्यश्च इंद्रियाणीनां प्रत्याहरणमुक्तं तेषां न तेषमात्मनः पृथक्सत्वमस्तीति सिद्धं न चैनेह नाना
स्ति किंचनेत्यादिश्रुत्या तेषां बाधान्तरस्तीति वाच्यं दृष्टहेति प्रतीच्येवं तन्निषेधात् न हि दृष्टभूतले घटो नास्तीत्युक्ते घटस्य स्वरूपं निषिध्यते किंतु तस्य भूतलसंबंधमात्रं तस्मात्कामानां पृथक्सत्वमस्त्यतो
नाद्वैतसिद्धिरित्याशंक्य सदृष्टांतं परिहरति आपूर्यमाणमिति प्रविशंतीभिरद्भिरापूर्यमाणमपि अचलप्रतिष्ठं अनुद्रिक्तं हि हीनत्वात् सर्वं निगच्छंतीभिरद्भिः क्रियमाणमपि अचलप्रतिष्ठं अपू हा
सहीनत्वादित्यपि बोध्यं एवंविधं समुद्रं यद्वत् आत्मप्रभवा आपः प्रविशंति तद्वत् यं पुरुषं कामैरापूर्यमाणं हीयमानं हि अचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वात् आत्मप्रभवाः सर्वे
कामाः प्रविशंति स एव शांतिं मोक्षं आप्नोति कदुःखोपरमं प्राप्नोति न तु कामकामी विषयार्थी अयं भावः कूटस्थस्यात्मनः सर्वस्य उत्पत्तिरेव चलयतीति सर्वेषु श्रुतिस्मृतिप्रसिद्धं तेन
कामानां प्रहाणं तेभ्यश्चेंद्रियाणां प्रत्याहरणं स्मर्यमाणं न तेषां परमार्थतः पृथक्सत्वं साधयति बहुप्रमाणविरोधात् किंतु यामरणप्रसिद्धं पूर्वक्तमभिप्रेत्य प्रहाणादिकमुक्तं प्रविला
स्मर
पूर्व

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७०॥

पन त्वेनैव व्याख्येयं यथाग्नये विविक्ते पाकपालं निर्वपेदित्यादौ निर्वपतिनापाग उच्यते न नु श्रोतार्थमात्रं तद्वदिहापि ज्ञेयं नेह नानास्तीत्यपि दृश्यमाने प्रपंचे आत्मातिरिक्तं नानात्वं कि
मपि नास्तीत्येवं परतया व्याख्येयं तथा च आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं खल्विदं ब्रह्मैवेत्यादयः श्रुतिवादाः संगच्छंते आत्मनि कल्पितस्यास्य तत्रैव निषेधे नानात्वस्य सत्वानुपपत्तेर्न कामानां पृ
थक्सत्वमस्तीति युक्त एव समुद्रदृष्टांतः यत्तु समुद्रात्पृथग्गंगायाः सत्वमस्तीति तन्न कार्यकारणयोरतिरिक्तसत्ताया अभावात् वाचारंभणं विकारो नामधेयमिति कार्यस्य वाग
॥ लंबनमात्रत्वश्रवणादित्यन्यत्र विस्तरः ७०॥

प्रासंगिकीमाशंकांपरिहृत्यप्रजेतकिमित्यस्यप्रश्नस्योत्तरमाहयेतिपूर्वोक्ता विविधान्कामान्विहाययःचरतिविषयान्भुंक्ते निस्पृहश्चयतोनिर्ममममतावान्नहिइदंममभूयादित्येवमपधनाद्यर्थेस्पृ
हांकरोतिनिर्ममोपिकुतःयतोनिरहंकारःनत्पहंकारशून्यस्यसमाहोममताहृष्टातस्मादहंकारप्रविलयात्शांतिंमोक्षंप्राप्नोति अत्रयःसर्वत्रानभिस्नेहइतिसर्वत्रयच्छद्दर्शनात्समाधिवि
धियरएवायंग्रंथः अन्यथास्थितप्रज्ञस्यप्रकृतत्वात्तस्यैवलाभोयच्छद्बोऽनर्थंप्राप्नोतिलोकेपिहिपरस्वभावकथनेसएवंकरोतीतितच्छद्सएवप्रयुज्यतेनतुयच्छद्ः विधौतुयएवंकरोति
सइदंप्राप्नोतीतिद्वयोरपिप्रयोगोदृश्यतेलक्षणकथनार्थत्वेपितत्रतात्पर्याभावाद्विधावेवपर्यवसानमितिदिक् ७१ प्रतिपादितांकर्मयोगप्राप्यांसांख्यनिष्ठांफलेनस्तुवन्नुपसंहरति
एषेतिएषास्थितप्रज्ञलक्षणप्रसंगात्कथिताब्राह्मी ब्रह्मशब्देनात्रब्रह्मविदुच्यतेब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः यस्यैवंब्राह्मीस्थितिः निष्कामतोनिष्ठांप्राप्यनरोनविमुह्यतिपुन

विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः निर्ममोनिरहंकारःसशांतिमधिगच्छति एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्र
ह्मनिर्वाणमृच्छति ७२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोऽध्यायः २ ॥

र्मोहंनप्राप्नोति [illegible] अस्यांत्र्यं तत्कालेपिस्थित्वेतिसकृज्ज्ञातापीयंफलवतीनतूपासनावच्चिराभ्यासमपेक्षतइत्युक्तंब्रह्मनिर्वाणमृच्छतिप्राप्नोतिकिंलोकांतरवद्गतिप्राप्यंब्रह्मने
त्याह निर्वाणमितिनिर्गतंवानंगमनंयस्मिन्प्राप्येब्रह्मणितन्निर्वाणं तथाचश्रुतिः नतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंतेब्रह्मैवसन्ब्रह्माप्येतीतिगतिमंतरेण प्राणरूपोपा
धिप्रविलयमात्रात्घटनाकाशस्यमहाकाशत्वप्राप्तिवत्जीवस्यब्रह्मप्राप्तिमाह अंतकालेपीत्यपिशब्दात्योब्रह्मचर्यादाश्रमात्तिष्ठतिसब्रह्मनिर्वाणंकिमुतिकमायेनप्राप्नोतीति
गम्यते अस्याध्यायस्यार्थःसंगृहीतोमधुसूदनश्रीपादैःज्ञानंतत्साधनंकर्मसत्त्वशुद्धिश्चतत्फलं ज्ञानिनिष्ठैवेत्यध्यायेस्मिन्प्रकीर्तितम् ० ॥ ॥ ॥ ॥

इतिश्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेभीष्मपर्वणिभगवद्गीतार्थप्रकाशेद्वितीयोध्याय २ पूर्वस्मिन्न
ध्यायेएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणुतिद्वेबुद्धीप्रदर्श्यव्यवसायात्मिकाबुद्धिरितिश्लोकेनसांख्यनिष्ठावतांयातांशंकानास्तिकर्मसंयोगानिष्ठावतांतुसास्तीत्युक्तायावा
नर्थउदपानेइतिसांख्यनिष्ठायांसर्वेकर्मफलांतर्भावश्चवर्णितात्मेवप्रशमात्मिकोक्ताशयानुकूलांमत्वानोर्जुनउवाचज्यायसीतिहेजनार्दनकर्मणोनिष्कामकर्मयोगा
पेक्षयाबुद्धिःसांख्यनिष्ठालक्षणंज्ञानंज्यायसीप्रशस्ततराचेत्तेतवमाताततर्हिमांभैक्ष्यवृत्त्यापितुष्यंतंघोरेबंधुवधाख्येकर्मणिकिंतुकस्माद्धेतोर्नियोजयसिपुनःपुनर्युध्यस्वेतिव
दन् १ नतुतवज्ञाननिष्ठायामनधिकारात्कर्मैवकुर्वितित्वांब्रवीमीत्याशंक्याहव्यामिश्रेणेतिअविविक्तेनेवशब्दोविविक्तोपिबुद्धिदोषादविविक्ततांगच्छामीतिसूचयति

टि २

अर्जुनउवाच ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन तत्किंकर्मणिघोरेमांनियोजयसिकेशव १ व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे

॥ तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयाम् २ ॥

तेनवाक्येनत्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुनेतिक्वचिद्वेदनिष्ठांत्याजयसिकर्मण्येवाधिकारस्तेइतितामेवचग्राहयसितथानिर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआ
त्मवान्भवेतिचनिवृत्तिमार्गंउपदिशसिधर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतइतिप्रवृत्तिमप्युपदिशसिनस्वेनमयायुगपद्द्वयंस्थितिगतिवदनुष्ठातुंशक्यंअतोमे
ममबुद्धिंमोहयसीवबस्तुंममोहंनाशयितुंप्रवृत्तोसीतिइवशब्देनोच्यतेतत्रयोर्मध्येएकंप्रधानंमयोग्यंतत्निश्चित्यवदयेनानुष्ठितेनाहंश्रेयःकल्याणंआप्नुयात् २

तत्

प २

अत्रोत्तरं श्रीभगवानुवाच लोकेस्मिन्निति पुरा पूर्वोध्याये मया निष्ठा एकैव प्रोक्ता परंतु सा द्विविधा द्विप्रकारा एकस्या एव ब्रह्मनिष्ठायाः प्रकारद्वयमुक्तं अधिकारिभेदेन न तु ब्रह्मप्राप्तये
परस्परनिरपेक्षं मार्गद्वयमुक्तमिति भावः हे अनघ विशुद्धांतःकरण मद्वचनस्यार्थं सम्यगालोचयेत्यर्थः तदेव प्रकारद्वयमाह ज्ञानयोगेनेति सांख्यानां प्रकृतिपुरुषयोर्विवित्तं ज्ञा
नतो आत्मनात्मविवेकज्ञानयोगः ज्ञानोपायो वेदांतश्रवणमनननिदिध्यासनात्मकस्तेन ज्ञानयोगेन ब्रह्मणि निष्ठां परिसमाप्तिं सांख्याः प्राप्नुवंतीत्यर्थः योगिनां सिद्ध्यसिद्ध्योः समो

श्रीभगवानुवाच लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघः ज्ञानयोगेन सांख्या
॥नां कर्मयोगेन योगिनां ३॥

भूत्वा समत्वं योग उच्यत इति उक्तलक्षणा योगवंतां कर्मयोगेन संध्योपासनादि निर्विकल्पक समाध्यनुष्ठानांतमिदं कर्मयोगपदार्थः तेन योगिनो ब्रह्मनिष्ठां प्राप्नुवंतीत्यर्थः अयं
भावः इह जन्मनि जन्मांतरे वा ईश्वरप्रीत्यर्थमनुष्ठितैः कर्मभिर्विशुद्धसत्वो विवेक वैराग्य शमादिषट्कोपेतो मुमुक्षुः प्रत्यक्श्रवणादितः श्रवणमननाभ्यासेनैव कृतार्थो भवति स
चेत् श्रवणादेः प्रागेव समाहितचित्तस्तर्हि निदिध्यासनस्यापि क्लिष्टत्वमुक्तः सोयं सांख्यमार्गः तथा सर्वाणि कर्माणि परमगुरावर्पयन् श्रवणमननात्मक विचारमंतरेणैव केवलं
॥शुद्धात्प्रतीचो निः ॥

विशेषब्रह्मरूपत्वं गुरुवाक्यतो निश्चित्यासंभावनादिदोषरहितश्चाचार्योक्तिगुरुणा ब्रह्मोपास्तिप्रकारमधिगम्य कर्मच्छिद्रेषु समाधिमभ्यासं कुर्वन्ननिष्फलं प्रत्यगात्मस्वरूपं साक्षात्क
रोतीति सोऽयं योगमार्गः तेन ऊहांको शल्यं येषामस्ति ते सांख्याः येषां तन्नास्ति मियो योगिन इति अतद्द्वयं हि प्रकारानिष्ठानतु द्वे निष्ठे इति अभिमत्तव्यं यथोक्तं वशिष्ठेन द्वौ क्रमौ चित्तनाशाय
योगो ज्ञानं च राघव योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं यासाध्यः कस्य चित्तस्य निश्चयः प्रकारो द्वौ ततो हि वीजगात्परमः शिव इति चित्तादर्शनोपलक्षितस्य ब्रह्मसाक्षा
त्कारस्य द्वौ क्रमौ चित्तादेर्मिथ्यात्वपक्षे ज्ञानमेव यथा रज्जुरगादि सम्यगवेक्षणेनैव नश्यतीति तत्तस्य सत्यत्वपक्षे योग एव यथा सत्यउरगः मंत्रादिनानिरुद्धप्रचारः
स्वयमेव नश्यतीति तद्वच्चित्तमपि योगेन निरुध्यमानं नश्यतीति तस्य निरन्वयोच्छेदस्तु प्रारब्धकर्मान्ते पक्षद्वयेपि तुल्य इति ३ ॥ ३ ॥ ३ ॥

गी० ७५

अनयोः प्रकारयोरंगांगिभावमाह नकर्मणामिति कर्मणां यज्ञादीनां अनारंभात् अननुष्ठानात् नैष्कर्म्यं ज्ञाननिष्ठां नाश्नुते न प्राप्नोति विविदिषंति यज्ञेनेति श्रुत्या यज्ञादीनां विनियोगत्वेन विधानात्
ननु संन्यस्य प्राधान्यात्कर्मणां विविदिषोत्पत्तावेवोपयोगो गम्यते तेन विविदिषायां यज्ञादिना सिद्धायां एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीति श्रुतेः प्रव्रज्यारूपमेव नैष्कर्म्यमिह ज्ञाननिष्ठासाध
नत्वाख्यं न ज्ञानं नैष्कर्म्यसिद्धिं समाधिगच्छतीति योजनायां परमामित्यादिवदत्र नैष्कर्म्यस्य परमत्वविशेषणस्याभावात् न च कर्मयोगजनितचित्तशुध्ध्यभावे केवलात्संन्यासात्सिद्धिं समधि
गच्छतीति योजनायां विहितयोर्ज्ञानकर्मणोः समुच्चयासंभवस्याभीष्टस्य सिद्धेः किमिति नैष्कर्म्यशब्देन ज्ञाननिष्ठाग्रहणमिति चेन्न सत्यं गुरोः कर्मकार्यत्व इति वाक्यशेषान्नैर्गुण्यहेतुकं सुखं
ज्ञानमेवेह नैष्कर्म्यपदार्थः ननु प्रव्रज्या विविदिषंति यज्ञेनेत्यत्रापि जिज्ञासितव्यस्येन जिज्ञासस्य सिनेत्यद्विवक्तव्यांतस्य धात्वर्थे नैवान्वयात् अश्मादीनां गमनादिविषयज्ञादीनां वेदन एवान्व
योज्ञेयः एतमेवेति श्रुतिस्तु विविदिषासंन्यासाभिप्रायेण प्रवृत्ता एतद्धैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरंतीति ज्ञान

नकर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते   नच संन्यसनादेव सिद्धिं समधिगच्छति ४॥

परिपाकार्थे स जीवन्मुक्तिसुखार्थे स्य याज्ञवल्क्यादिभिरनुष्ठितस्य विद्वत्संन्यासस्यापि शास्त्रे दर्शनात् असंन्यासिनो ज्ञानमेव नोत्पद्यत इति प्रावामगनहो विक्षेपकर्मत्यागरूपसंन्यासविष
यः न तु काषायपरिधानमात्रविषयः गार्गीवाचवशिष्ठादीनामतथाविधानामपि ज्ञानोत्पत्त्यवगमादित्यास्तां तावत्कर्मभिरशोधितचित्तस्य मंदबुद्धेः रागद्वेषाक्लिष्टस्य त्वात्मानात्मविवेक
द्वारा वा नैष्कर्म्यप्राप्तिर्नास्तीति पूर्वार्धार्थः नन्वभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेदिति केवलात्कर्मसंन्यासादपि नैष्कर्म्यसिद्धिः स्मर्यते तत्कथमुच्यते नकर्मणामनारंभान्नैष्कर्म्यमस्तीति तत्राह
न चेति कर्मजचित्तशुद्ध्यभावे कृतादपि संन्यासान्न मोक्षसिद्धिरुक्तास्ति स्मृतिस्तु चित्तशुद्धिपूर्वकसंन्यासाभिप्रायान हि रागादिमतः सर्वभूतेभ्यः सर्वात्मनाभयं दातुमिष्टे अतो युक्तमुक्तं न
च संन्यसनादेवेति ४ ॥ ४ ॥

राम० ७५

एतदेव प्रपंचयति नहीति अवशः कर्मेत्यस्य भावात् अजितचित्तः कश्चिदपि जातु कदाचित्समाधिकालेपि क्षणमपि अकर्मकृत्कर्माणि दुर्मनोरथादीनि अकुर्वन्नहि प्रसिद्धं न तिष्ठति हि यस्मात्सर्वोपि लोकः प्रकृतिजैर्गुणैः सत्वरजस्तमोभिः स्वभावप्रभवैः रागद्वेषादिभिः कर्म कायिकं वा वाचिकं मानसिकं वा कार्यते अवश्यं तत्र प्रवर्त्यते ५ ननु एवं ध्यानेनैव चित्तशुद्धि म[illegible]पि संन्यासिष्यामी किं कर्मभिरित्याशंक्याह कर्मेंद्रियाणीति यो विमूढात्मा गाधाक्रांतचित्तः कर्मेंद्रियाणि वागादीनि संयम्य निगृह्य आस्ते एकांते ध्यानापदेशेनोप विशति स मिथ्याचारः तस्य तदासनादिकं अर्थोरराणां मिथ्या अलीकमेव निष्फलत्वात् तत्र हेतुः इंद्रियार्थान् मनसा स्मरन्निति इंद्रियार्थान् शब्दादीन् श्रोत्रादिभिरगृह्णतिम

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५ कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्था न्विमूढात्मा मिथ्याचारः स उच्यते ६ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७ ॥ ७ ॥

नसा च स्मरन्निति अतो मिथ्याचारः स विषयानर्चिंतयन्योगनिष्ठमात्मनो लोके अभिव्यंजनन्निति अतः कपटीत्यर्थः तस्मात्कर्मव्यतिरिक्तश्चित्तशुद्ध्युपायो नास्तीति भावः ६ यस्तु पूर्वस्मान्मिथ्याचारात्विलक्षणः पुरुषधौरेयः इंद्रियाणि मनसा सह नियम्य रागद्वेषवियुक्तानि कृत्वा कर्मेंद्रियैः कर्मयोगं आरंभते हेऽर्जुन सः कर्मफले स्वर्गादौ हि के ॥शब्दादौ असक्तोऽनासक्तो विशिष्यते एवं स्मादधिको भवतीत्यर्थः ७॥

भी०
७५

निपत्तमितियस्मादेवंतस्मात्त्वंनियतंसंध्योपासनादिकंमैवकुरुयद्वानियतंनियमेनत्वंकर्मनित्यकाम्यसाधारणंयत्पापविनिवर्तकंअस्त्रभावंतदेवकुरुहियस्मात्अकर्मणःअकलक
मैंद्रियनिग्रहेणतत्कारणात्तुचित्तजयशून्यात्कर्मैवज्यायःप्रशस्ततरं अपिचतेतवक्षत्रियस्यअकर्मणःसंन्यासमपिचित्तशुद्धेःसर्वकर्मत्यागिनःशरीरयात्रादेहस्यवहनं नप्रसि
ध्येत्भैक्ष्यचर्यायामनधिकारात्ब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिसंन्यासविधायकेवाक्येराजाराजसूयेनस्वाराज्यकामोयजेतेत्यत्रराज
पदवत्ब्राह्मणपदस्यविवक्षितत्वात्तथात्वतावत् आश्रममात्रंब्राह्मणस्यत्रयोराजन्यस्यद्वौवैश्यस्येतिस्मृतेश्च अन्यत्रापितुक्तापाज्ञ्यकृत्यमुखजानामयंधर्मोवैष्णवलिंगधारणंवा

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचतेनप्रसिध्येदकर्मणः ८ यज्ञार्थात्क
र्मणोन्यत्रलोकोयंकर्मबंधनः तदर्थंकर्मकौंतेयमुक्त संगः समाचर ९ ॥ ॥

ग्रजातेरजातानामयंधर्मोविधीयतइति ८ ननुकर्मणावध्यतेजंतुरितिकर्मणांबंधकत्वस्मृतेः कथंमुमुक्षुंमांतत्रनियोजसीत्याशंक्याह यज्ञार्थादितियज्ञःपरमेश्वराराधनं
यजदेवपूजायामितिधात्वर्थानुगमात्तदर्थंयज्ञोवैविष्णुरितिश्रुतेर्विष्णुर्वातदाराधनार्थंयत्कर्मततोन्यत्रकर्मणिस्वर्गाद्यर्थंप्रवृत्तोयंलोकःकर्मबंधनःकर्मणावध्यतेनतु
ईश्वराराधनंअतस्तदर्थंईश्वराराधनार्थंकर्मवर्णाश्रमोचितंहेकौंतेयमुक्तसंगःफलाभिलाषशून्यःसन्समाचरसम्यक्कुरु ९ ॥ ॥ ९॥ ॥ ९॥ ९॥

त:२ वि१

राम०
७५

एतद्देवार्थवादेन द्रढयति सहेति यज्ञैः सहेति सहयज्ञाः वोपसर्जनस्येति पक्षे मादेशाभावः कर्मभिः कृता इति यावत् प्रजा ब्राह्मणाद्याः अनेन यज्ञेन प्रसविष्यध्वं सवो वृद्धिस्तां लभध्वं एष यज्ञः
युष्माकं इष्टकामधुक् इष्टार्थप्रदोस्तु १० इष्टार्थप्रदत्वमेवाह देवानिति भावयत वर्धयत अनेन देवतायज्ञात्मके यज्ञेन वयुष्मान् भावयन्तु वृष्ट्यादिना एवं परस्परं भावयन्तो देवा
श्च यूयं च श्रेयः परं प्राप्स्यथ ११ किं च इष्टानिति पश्चाद् वृष्ट्यादिना अन्नादिरूपान् देवताः दत्तान् एभ्यो अप्रदाय अदत्वा देवतोद्देशेन दत्त्वा पञ्चमहायज्ञात्मकेन यागेन नित्यनैमि
त्तिकरूपेण वैश्वदेवाग्निहोत्रजाते अन्नादिरूपं अन्नं स्वात्मार्थं अदत्वा यो भुङ्क्ते स स्तेन एव १२ ये तु यज्ञशिष्टाशिनः वैश्वदेवादिशिष्टान्नभोजनशीलाः सन्तः पापा कारणान्ते मुच्यं

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् १० देवान् भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः प
रमवाप्स्यथ ११ इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः १२ यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः भुञ्जते
॥ ते त्वघं पापा ये पचन्त्यात्मकारणात् १३ ॥

ते मुच्यन्ते सर्वकिल्बिषैः प्रमादकृतैः विहिताकरणनिमित्तैः ये त्वात्मकारणात्स्वार्थमेव पचन्ति न तु पञ्चमहायज्ञार्थं ते पापाः स्वयं पापरूपा एव सन्तः पापमेव भुञ्जते तथा च स्मृतिः
कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी पंच सूना गृहस्थस्य ताभिः स्वर्गं न विंदति इति पंचसूनाकृतं पापं पंचयज्ञैर्व्यपोहति इति च श्रुतिश्च एष कमेवास्य तत्साधारणमन्नं यदि
मधन्ते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रं ह्येतदिति मंत्रवर्णोपि मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति
॥ केवलादीति १३ ॥

जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्मकर्त्तव्यमित्याह अन्नादिति अन्नात्रेतोरूपेण परिणतात् भूतानि प्राणिशरीराणि भवंति अन्नंच पर्जन्यात् वृष्टेः संभवति पर्जन्यश्च यज्ञाद्भवति यज्ञेन हि अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नंततःप्रजा इति स्मृतेः यज्ञोदेवताराधनजो धर्मः कर्मभ्यो यागहोमदानादिभ्यः समुद्भवतीति कर्मसमुद्भवः १४ कर्मब्रह्मोद्भवं वेदोद्भवं वेदस्यैव धर्मेप्रमाणानतु पारवंडादिप्रणीतागमः ब्रह्म वेदोपि अक्षरसमुद्भवं अस्यमहतोभूतस्य निश्वसितमेतद्यदृग्वेदोयजुर्वेद इत्यादिश्रुतेः सा क्षा

अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५॥

त्परमेश्वरादेवउत्पन्नः अतोनतत्रभ्रमविप्रलंभत्वादिदोषाशंकांत्तपारवंडादिवाक्यवदप्रामाण्यशंकास्तीतिभावः यस्मादेवंतस्मात्सर्वस्मिन्देशे कालेचवर्त्तमानंब्रह्मवेदः ए तेनवेदस्यानित्यत्वं शब्दस्याविभुत्वंचदर्शितं नित्यंनियमेनयज्ञेप्रतिष्ठितंतात्पर्येणपर्यवसन्नं १५ ॥ १५ ॥ ॥ १५ ॥ ॥ १५ ॥ ॥ १५ ॥ १५ ॥

भवत्वेवं ततः किं फलितमित्यत आह एवमिति भूतानामादौ वेदाभिगमस्ततः कर्मज्ञानं ततः कर्मानुष्ठानं ततो देवानां तृप्तिस्ततो वृष्टिस्ततोऽन्नं ततो भूतानीत्येवं वेदाधिगमस्त्वेवं हर्षवत्कमिव चक्रं निरंतरमावर्तमानं जगतो निर्वाहकं नानुवर्तयति नानुतिष्ठति सः अघायुः पापजीवनः इंद्रियारामो न तु धर्मारामः आत्मारामो वा मोघं व्यर्थं दशमशकादिवज्जीवति यस्त्विदमनुवर्तयति स जगदुपकारको धन्य इति भावः तथा च श्रुतिः अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छति तेन पितॄणामथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवंति तेषां लोक इति १६ एवमीश्वरेणावेद

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य

॥ कार्यं न विद्यते १७ ॥

वसायपूर्वकं जगच्चक्रं प्रवर्तितमतस्तैरधिकृतैरनुवर्तितव्यमित्युक्तं अस्य अननुवर्तने च महान्प्रत्यवाय उक्तः स ब्रह्मविदपि स्यादिति संभवितामाशंकां परिहरन्नियस्त्विति आत्मन्येव रतिः प्रीतिर्यस्य न तु स्त्र्यादौ स तथा न चात्मनि प्रीतिः प्राणिमात्रस्यानौपाधिको अस्ति प्रत्यक्षत तदर्थत्वेनैव स्त्र्यादिविषयप्रीतिर्भवतीत्यत उक्तं आत्मतृप्तश्चेति आत्मनैव परमानंदरूपेणात्मनो न मिष्टान्नादिना ननु मंदाग्निरपि स्त्र्यादौ न रमते नापि मिष्टान्नेन तृप्यति अत उक्तं आत्मन्येव च संतुष्ट इति मंदाग्निर्हि धातुवृद्धिं जाठराग्निदीपनं च कामयमानः औषधाद्यर्थमितस्ततो धावति न त्वात्मन्येव तुष्यति विद्वांस्तु रति तुष्टी आत्मनैवानुभवति न स्त्र्यन्नधनादिभिरिति तस्य कार्यं कर्तव्यं किमपि नास्ति क्रियां प्राप्य कस्यचिदप्यर्थस्याभावा

॥ तु १७ ॥ ॥ १७ ॥

एतदेवाह नैवेति तस्यात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनं नास्ति स्वर्गादेरलिप्साभावात् मोक्षं वा क्रियासाध्यत्वात् नास्त्यकृतः कृतेनेति श्रुतेः अकृतेनापि कृतेन कर्मणा नास्तीति स्मृत-
र्थः अकृतेन विहितकर्मणापि अर्थो नरकादिरूपो नास्ति अत्र कृताकृतशब्दौ मिश्रामिश्रपरस्परविरुद्धार्थवाचितया पुण्यपापपरत्वेनोपेतः अकृतेनेति भावेन निष्ठा नित्याकरणात् तु
तस्यो वा प्रत्यवायप्राप्तिरूपो वा कश्चन योऽविदुषो नास्तीति व्याचक्षते तेषामप्यभावाद्भावोत्पत्तेरनभ्युपगमात् नित्यानां कालेयत्नद्विविहितं क्षिपते तत एव प्रत्यवायोत्पादो वक्तव्य इति ध्येयम्

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन नवास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८॥
तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९॥

त्रिवो १

प्राप्तान्तं आप … घते अत्रोपपत्तिमाह न चेहेतीयस्मात् अस्य आत्मरतेः सर्वभूतेषु चेतनाचेतनेषु उत्तममध्यमाधमेषु कश्चिदपि अर्थव्यपाश्रयः सुखभोगात्मकप्रयोजनाभि-
संबंधो नास्ति आत्मरतित्वादेव निष्कामत्वाद्धि दुःखसुखपुण्यपापफलसंबंधो नास्तीत्यर्थः १८ यस्मान्निष्कामस्य कर्मलेपो नास्ति तस्मात् असक्तस्त्वमपि असक्तः फलासक्तिशून्यः सततं
सर्वदा कार्यं अवश्यं कर्तव्यं कर्म नित्यनैमित्तिकं समाचर हि यस्मात् असक्तः कर्माचरन् परं मोक्षं सत्त्वशुद्धिद्वारेणाप्नोति। १९ ॥ ॥१९॥ ॥१९॥

अत्र शिष्टाचारं प्रमाणयति कर्मणेति कर्मणैव संसिद्धिं सत्त्वशुद्ध्या सम्यग्ज्ञाननिष्ठां प्राप्तुं आस्थिताः प्रवृत्ताः जनकादयः यस्मात्क्षत्रियाः न तु संन्यासेन ननु शुद्धचित्तस्य नास्ति कर्मापेक्षेत्याशं
क्याह लोकेति। लोकस्य संग्रहः स्वधर्मे प्रवर्तनं तु स्वप्रयोजनाभावेपि केवलं लोकसंग्रहार्थं चेत्कर्म कर्तव्यं तदा विदुषां ब्राह्मणानामपि संन्यासो न स्यात् यतीनेव संन्यासधर्मो न ग्राहयितुं तेषां संन्यासः
इति चेत् अर्जुनेपि न तर्हि इवारितमस्ति ननु क्षत्रियस्य संन्यासे अधिकारो नास्तीति चेत् तल्लिंगधारणे विकाराभावेपि भरतश्रेष्ठ भाविक्षेपकर्मत्यागमात्रे अधीकारात्तु वार्त्तिके सर्वाधिकारविच्छेदिज्ञानं चेत्स्यु

कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते २१ न मे पा
र्थास्ति कर्तव्यं त्रिषु लोकेषु किंचनः नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि २२ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः २३ ॥

ये यतेकुतो विकारनियमो स्यात् यानेनिश्चिये तेवला दिति विद्वत्संन्यासे क्षत्रियादेरपि अधिकारस्य साधितत्वात् अतो लोकसंग्रहो न मुख्यं कर्मप्रयोजनमिति चेत् सत्यं न मे पार्थास्ति कर्त्तव्यमिति स्व
दृष्टांतेन अधिकारित्वात् अर्जुनस्यैवं नियोज्यते न क्षत्रियमात्रमिति तुष्यतु भवान् २० २१ कर्मणि वर्त्त एव अहं कर्म करोम्येवेत्यर्थः २२ यद्यहं कर्मणि न वर्त्तेयं तर्हि मनुष्याः ममैव वर्त्मा
॥नुवर्त्तन्ते अवर्त्तेरन् न कर्म न कुर्वीरन्नित्यर्थः अतन्द्रितोऽनलसः सर्वशः सर्वप्रकारैः २३॥

भी.
७८

ततश्च किमित्यत आह उत्सीदेयुरिति यद्यहं वर्तित्वा देहपरायोजनाकेवलं लोकसंग्रहं पश्यन्कर्त्तुमर्हसि अपितु श्रेष्ठाचारत्वात्पीत्याहयदिति तत्पाचममश्रेष्ठस्ययाहशाचाचारस्ताहृशस्वमस्तु
वर्त्तिना त्वया अनुष्ठेयः नस्वातंत्र्येणान्यहत्यर्थः कीदृशस्तवाचारोयोमयानुवर्तनीयइत्याकांक्षायांनमेपार्थेत्यादिभिस्त्रिभिस्तोकैस्तत्प्रदर्शनमितिमधुसूदनश्रीपादाः २४ यस्मादृशेएवत्वं
धीसि तथापि तथापि यराजुम्नहार्थं कर्माणिकर्वित्याह सक्ता इति कर्मणिकर्मफलेकुर्वंतिकर्माणी विशेषः असक्त इतिछेदः २५ विद्वान् अज्ञानांकर्मस्वारक्तानांबुद्धिभेदंबुद्धेश्चालनंनजनयेत्तेना
त्पादयेत् किंतुतानुसर्वाणिजोषयेत्सेवयेत् कथं युक्तश्चाहितो भत्वासमाचरन् २६ अविद्वान्कथंकर्मसुसज्जतइत्यत आह प्र कृतेरितिप्रकृतेः प्रारब्धस्य योः सत्वरजस्तमोगुणात्मिकायाः दे

उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं संकरस्यचकर्त्तास्यामुपहन्यामिमाः प्रजाः २४ सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसं
ग्रहं २५ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन् २६ प्रकृतेःक्रियमाणानिगुणैः कर्माणिसर्वशः अहंकारविमूढ
॥त्माकर्त्ताहमितिमन्यते २७॥

वात्मशक्तिंस्वगुणैर्निगूढमिति श्रुतिप्रसिद्धायाः शक्तेर्गुणैः कार्यकारणसंघातात्मकैः क्रियमाणानिकर्माणि अहंकारेणस्वस्मिन्नध्यस्तेनमूढः तदीयात्कर्तृत्वात्तदीनात्मधर्मत्वेनपश्य
न आत्मनश्च असंगानंदसंविद्रूपतामपश्यन् आत्मा अहंकारेणविमूढश्चाबोसौतेनविमूढः अहंकर्माणिकर्मणां कर्त्तेतिमन्यते कर्त्रध्यासेन कर्त्ताहमिति तत्प्रत्ययः तेननलो
काव्ययनिष्ठारवलर्थत नामितिषष्ठीनिषेधः अन्यथा तत्प्रत्ययेकर्मणां कर्त्ताहमितिषष्ठ्याभाव्यं २७ ॥ २७ ॥ २७ ॥ २७ ॥ २७ ॥

राम०
७८

एवंसक्तस्यकर्माचरणंप्रदर्श्यासक्तस्यतद्दर्शयतितत्त्वविदितिगुणकर्मविभागयोः गुणविभागस्यकर्मविभागस्यचतत्त्व विदितिभाष्यंनाहंगुणात्मकइतिगुणेभ्य आत्मनोविभागःनाहंकर्मा त्मकइतिकर्मभ्यश्चात्मनोविभागयोस्तत्त्वंवेत्तीतिश्रीधरःमधुसूदनस्तुगुणादेहेंद्रियांतःकरणानिचाहंकारास्पदानिकर्माणितद्व्यापाराममतास्पदानिगुणकर्माणितेभ्योहंकारास्पदे विभज्यतेसर्वेषांजडानांभासकत्वेनपृथग्भवतीतिविभागःस्वप्रकाशज्ञानरूपोसंगआत्मागुणकर्मचविभागश्चेतिद्वंद्वःतयोर्जडाजडयोस्तत्त्वंयोवेत्तिसःकरणानिकरणात्मकाःगुणा गुणविषयेषुवर्त्तंतइतिमत्वानसज्जतेकर्तृत्वाभिनिवेशंनकरोतीत्यर्थःगुणविभागस्यकर्मविभागस्यचतत्त्वविदितिपक्षेगुणाकर्माणितेष्वेवमित्थंविभागपदंव्यर्थमितियद्यपितत्त्ववि

तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्त्ततइतिमत्वानसज्जते २८॥

त्सगुणाःगुणेषुवर्त्ततइतिमत्वागुणविभागेचनसज्जतइतियोजनागुणानांसत्त्वरजस्तमसांविभागःबुध्यहंकारज्ञानेंद्रियविषयरूपेणविभज्यावस्थानेतस्मिन्ननसज्जतेइदमहमि तिनमन्यतेतथाहिशारीरःहंगौरोस्मिहस्ताभ्यामास्तेमपेदमात्तमितिचतथाहंद्रष्टाममेदंद्रष्टमितिअहंकारेणाभिमतेममेदमित्यभिमन्यतेउभौविज्ञीयमाणायामहंसुखीतिचसर्वेषु बुध्यादिषुविभाज्यस्वमारोपयपिप्रत्येकंप्रत्यक्तमध्यस्याहमिदमितिममेदंकर्मेतिचमन्यतेएतेनकर्मविभागोप्यावश्यकत्वेनव्याख्यातःअन्यथाचिदात्मन्येवआहानादिक

॥तत्त्वंदुःखादिमत्त्वंचापततिअयंचकर्मविभागःश्रुत्यापिदर्शितःअंधोमणिमविंदत्तमंगुलयवयत्अग्नीवःप्रत्यमुंचत \ ॥ ॥ ॥

भी०
७९

ततमजिह्वोऽयमस्त्वेति अधःस्वयंप्रकाशाहीनोपिचक्षुरादिभिर्गोचरस्यास्फिं विषयं [illegible] अविंदन्प्रकाशयति अंगुली:काष्ठकोष्ठादिवत्तुजडत्वात्स्वयंकर्मकर्तृत्वमशक्तोपिपारापारि:
आवयत् आसीयत्तविषयंजपादन्ते अमनीवच्छिन्नशिरस्कवन्निर्जीवोहंकारस्तंप्रत्ययसंचतनीवायोधारयत्निमपेहंल ध्वमितिमन्यते अजिह्वोधीयात्तु:जडत्वात्स्वगतसुखदु:खयो:
घटद्ववस्वगतस्यादे:प्रकाशनेऽसमर्थोपि अहंसुखीदु:खीतिचानुभवतितथाच आत्मानात्मनोर्याध्यात्म्यक्त्व्याद्गतेषहंकारादिषु तत्कममसचाभिमानादिषुकुतसेमेषुसत्त्वमिवाव
वर्त्तमानेऽयात्मनैतेष्वःएथमतंजाननगुणा:धीचक्षुरादय:अरोगसुखदु:खरूपादिषुवर्त्ततेनत्वात्मेतिमत्वानसज्जतेहमेवहस्तादिसंघातरूपोममैवेदमानंदिकंकर्मेतिनशक्तोभवती त्यर्थः॥२८

राम०
७९

एवंसतोसकर्माणिविभज्यसत्कर्मानुवादपूर्वकंतत्वबुद्धिभेदंजनयेदज्ञाना मित्युपक्रांतमुपसंहरतिप्रकृतेरितिगुणेभ्योदेहेंद्रियादिभिस्स्वस्मिन् अध्यस्तैः संमूढाः एकीभावेन अभेदाध्यासेन मूढास्तु प्रकृतेः प्र
कृतिसंबंधिषुगुणेषुदेहादिषुकर्मसुगमनादिषु वसज्जंते अहमयंमद्गुणानामेवेदंयत्त्वादिकंकर्मेतिसज्जंते सक्ताभवंतितान् मूढत्वात् अकृत्स्नविदः आत्मज्ञानहीनात् अविद्वि
न्मूढचित्तान् आत्मनोवा अदर्शनेनत्ववर्णेन मत्वा वित्तानैर्दंसर्वेविदितमितिश्रुते मंदान् शास्त्रार्थग्रहणासमर्थान् कृत्स्नवित् आत्मवित् न विचालयेत् कर्मनिष्ठातो न प्रच्यावयेत् ते चोभय
भ्रष्टत्वापत्तेः प्रकृतेर्गुणैः संमूढाः गुणानां कर्मसु सज्जंते इति प्राचां योजना २९ मयीति त्वं तु अन्तो मुमुक्षुश्च मयि सर्वांतर्यामिणि सर्वाणि कर्माणि संन्यस्य समर्प्य अध्यात्मचेतसा आत्मान

ति १

प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् २९ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भू
त्वा युध्यस्व विगतज्वरः ३० ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ३१ ॥ ॥ ३१ ॥ ३१ ॥

मयि कृत्स्नप्रवृत्तशास्त्रे अध्यात्मं तत्र प्रवणेन चेतसा शाकपार्थिवादिवन्मध्यमपदलोपी समासः आत्मानात्मविवेकवतेत्यर्थः ईश्वरप्रेरितोऽहं करोमीति अनया बुध्या निराशीः फलमनिच्छन्
निर्ममो लब्धेषु ममत्वाभिमानशून्यश्च भूत्वा युध्यस्व विगतज्वरो विशोकः सन् ३० ये म इति ये अन्येऽपि त्वादृशाः मे मम मतं अस्मत्कर्मानुष्ठानं अनुतिष्ठंति अनुवर्तंते मानवाः श्रद्धावंतः
॥ अनसूयंतो अत्र दोषमपश्यंतः तेऽपि स्वकर्मभिर्धर्माधर्म [illegible] र्मुच्यंते ३१ ॥

ति २

विपर्यये दोषमाह येत्त्विति सर्वशब्द ईश्वरवाची सर्वं समाप्नोषि ततोऽसि सर्व इति निर्वचनात्तस्य ज्ञाने विषये विशेषेण मूढान्मा दोषेणापि ते ईश्वरमजानंतो देहमात्रनिष्ठांस्तान् नष्टान् स्वर्गापवर्ग भ्रष्टान् अचेतसः विवेकशून्यान् ३२ ननु ते चेत्त्वन्मतं नानुतिष्ठंति तर्हि कथं त्वं वा तान्न यथाशिक्षमित्यत आह सदृशमिति स्वस्याः प्रकृतेः स्वकीयस्य प्राग्भवीय धर्माधर्मसंस्कारस्य सदृशमनुरूपं ज्ञा

नवानपि चेष्टते किमुत मूर्खः यस्मात् दृष्टिभिर्विशेषादिति न्यायात् तस्मात्प्रकृतिं यांति अनुसरंति भूतानि प्राणिनः तत्र मम वाऽन्यस्य वा निग्रहः किं करिष्यति निग्रहमपि अ[illegible]हमपि पूर्वकर्मापे क्षयैव तान् प्रवर्त्तयामीति भावः ३३ एवं तर्हि पुरुषस्य स्वातंत्र्याभावाद्विधिनिषेधशास्त्रं व्यर्थमिति आशंक्याह इंद्रियस्येति द्विर्वचनं वीप्सायां प्रतीइंद्रियं स्वे स्वे अर्थे शब्दादौ वचनाद्युचिते विषये

ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि। प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति। इंद्रि
॥ यस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४ ॥

रागद्वेषौ अनुकूले रागः प्रतिकूले द्वेष इत्येवं व्यवस्थितौ नित्यसंबंधौ न तु तयोर्वशं नागच्छेदिति शास्त्रस्यार्थः पुरुषस्य च तदनुष्ठाने स्वातंत्र्यमस्ति हि यतः तौ रागद्वेषावेवास्य प्राणिनः परिपंथि नौ श्रेयोमार्गे रणप्रवर्त्तकत्वात् ननु ईश्वरोऽस्य परिपंथीत्यस्य वैषम्यादि दोषापत्तेः अयं भावः यथा स्वरस्तेन स्वाज्ञोल्लंघनजेनापराधेन कुपितो राजापराधीनं हि निगृह्णाति निगृह्णातु स्वीयान्भृत्या न्प्रवर्त्तयति सेवायत्तेन दानमानेन प्रसादितः सन् तेषामेव भृत्यानामाधिपत्यं ददाति न एवं पूर्वकर्मानुसारी ईश्वरो रागादिद्वारा पुरुषं वा धर्मानोपि विधिप्रतिषेधशास्त्रानुसारिणा तेनैव भक्तिध्यानप्रणिधानेना वर्जितः एवं रागादिजयेन नियुंक्ते तस्माद्विधिप्रतिषेधशास्त्रस्यानर्थक्यं पुरुषस्य स्वातंत्र्यस तात्तनायोश्वरे वैषम्यादिकं प्राणिकर्मायत्तत्वादिति ३४ ॥

यस्मादेवं तस्मात् श्रेयान् प्रशस्ततरः स्वधर्मो स्वस्य वर्णोचितः [illegible] रूपेण रागादिभ्यो विहितत्वात् विगुणोऽपि हिंसादिमिश्रोऽपि किंचिदङ्गहीनोऽपि परधर्मात् हिंसादोषरहितपरधर्मोऽपि स्वनुष्ठितात् सर्वाङ्गो
पसंहारेण सम्यगनुष्ठितादपि स एव श्रेयान् स्वधर्मे युद्धादौ निधनं मरणमपि श्रेयः विहितत्वात् परस्य धर्मो भैक्ष्यचर्यादिर्भयावहः क्षत्रियस्य तत्र निषिद्धत्वात् तस्मात् त्वं त्वं तत्र त्वया स्वधर्म एवानुष्ठेय
इति भावः ३५ ईश्वरो धर्माधर्मौ रागद्वेषौ वा पुरुषस्य प्रवर्तको भवत इति आत्मनो स्वातन्त्र्यं मन्वानोऽर्जुन उवाच अथ केनेति केन ईश्वरादीनामन्यतमेनान्येन वा प्रयुक्तः प्रवर्तितः सन्नयं पुरुषः पापम

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ३५ अर्जुन उवाच
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३६ ॥ ॥

निष्ठ चरति करोति अनिच्छन्नित्यनेन रागद्वेषयोः प्रवर्तकत्वं निरस्तं सति हि रागे इच्छा भवति अतः इच्छाया अभावद्रागाभाव रागस्याप्रवर्तकत्वे तन्मूलभूतसंस्कारहेतोर्धर्माधर्मयोरप्रवर्तकत्वं
तत एव तस्यापेक्षत्वादीश्वरस्यापीति सर्वेषामाक्षेपः तस्मात् स्वयं प्रवर्तकं पश्यन् ह्यमित्यर्थे बलादिव नियोजितः विष्टिगृहीत इवेत्यर्थः ३६ ॥ ॥ ॥ ॥

अत्रोत्तरं काममय एवायं पुरुष इत्यादिश्रुतिसिद्धं श्रीभगवानुवाच काम एष इति एष प्रसिद्धः कामः सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीतेति श्रुतेरिदं मे भूयादिदं मे भूयादिति ती
व्राभिलाषः हेतुभूत इति चेत्तत्रानवच्छिन्नत्वात्पापहेतुत्वाद्विशेषः स च चेतोरूप एव कामः संकल्पहेतुपदकम्पस्तस्य सर्वं महत्त्वमुपसंहारात्स एव कामः केनचिन्निमित्तेन प्रतिहतः क्रोधरूपेणापरिणमते
तः क्रोधोऽभिज्वलनात्माप्येष एव ते मे नमिस्त्रह शरीरिणः स्थितं वैरिणं विद्धि कुतो वैरीयतः रजोगुणसमुद्भवः रजोगुणसंजनात्मकः प्रकृतेर्गुणाः तस्य गुणौ कार्यभूतौ तस्मात्संगोत्तावेव उद्भवो यस्य रजः
कार्यत्वाद्दुःखैकफलोपमतो वैरी यद्वा रजोगुणस्य लोभप्रवृत्त्यादिलक्षणस्य समुद्भवो यस्मात्तनुविषयाभिष्वात्मकः कामः कामो विषयार्येण न शाम्यति विषयस्पर्शे लेभ्यानिश्च यो स्वत स वा

श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ३७ ॥

निवर्तते अंधइवस्पृदृशेना अभिलाषादित्याशंक्याह महाशनो महापाप्मेति महत्तद्वातुमपारणीयं अशनमस्य सतथा यथोक्तं न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव
भूय एवाभिवर्धते ... महाशनत्वान्नायं वैर्यं वैरी दानसाध्यः नापि सामभेदसाध्योऽत्र स्तुगनत्वात् अतोहं तव्य एवेति ३७ ॥ ३७ ॥ ३७ ॥ ३७

भूय एवाभिवर्धति यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेदिति तथा महापाप्मा अनेन हि प्रेरितः पुरुषः प्रबोधितोऽपि
न निवर्तते १

अस्य वैरित्वमेव विवृणोति धूमेनेत्यादिना । उल्बेन गर्भवेष्टनेन जरायुणा तेन कामेन इदं वक्ष्यमाणं ज्ञानं आवृतं आवरणीयस्यैव विधानात् तदनुगुणं दृष्टांतत्रयं ज्ञेयं ३८ आवृतमिति ज्ञानं
अंतःकरणसत्वं हि धीभिः स्मितत्सर्वं मनस्येनिस्युतेः ए तेन कामेन रजोगुणात्मकेन आवृतं ज्ञानिनः अंतःकारणं विशिष्टस्य प्रमातुः नित्यवैरिणा कामरूपेण दुःपूरेणापूरयितुमयोग्येन
अयं हि पर्वमाणोः नर्थोने वपुस वेत् अनले न अथापि पूर्यते चेत् अनलः नास्त्यलंप्रयो सि यस्य सत्त्वाते नानलेन तस्य ननुः काष्ठैः तर्पयितुं शक्यः किंतु वर्द्धत एव तत्त्वहृदयमयी त्यथः अयं
भावः अंतःकरणसत्वं हि प्रकाशात्मकं तत्सहसेन कामो वह्निः स्वधर्मेन आवृतं चेत् प्रमातारं अनर्थं यातयति अन्यथा तु स्वभावशुद्धत्वात् विवेकवैराग्योपरमेभ्यः खानमुद्धरेत् अ

(नोति?

धूमेनाव्रियते वन्हिर्यथादर्शो मलेन च यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतं ३८ आवृतं ज्ञानमेतेन ज्ञानि नित्यवैरिणा ॥ कामरूपेण कौंतेय दुष्पूरेणानलेन च ३९ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं ४० ॥ ४० ॥ ॥

तोयं कामो ज्ञानिनो नित्यवैरीति ३९ किंच इंद्रियाणीति अयमर्थः इंद्रियमनोबुद्धयो हि ममेव अधिष्ठीनाः स्वास्वार्थप्रवणाम वंतितेभ्वत्त यामै तैरयं कामः ज्ञानं चिदाकाशरूपे आदर्शे तत्स्वप्रख्यं
यत्र योगिनो यद्रहिते विप्रकृष्टमतीतमनागतं वा पश्यंति यथोक्तमाचार्यैः विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं पश्यन्नात्मनीति निजांतर्गतं आत्मनि हार्दाकाशे स्वे ब्रह्मणि तत्तमले
न आदर्शमिव आवृत्य देहिनं देहाभिमानिनं विशेषेण मोहयति विशब्दात् देहाभिमानशून्यं योगिनमपि सुत्थानावस्थायां किंचिन्मोहयतीति गम्यते इति अक्षरयोजना स्पष्टा ४० ॥

(प१ क्र१)

तस्मादितियस्मादिंद्रियाण्यस्याधिष्ठानंसामंतस्थेवैरिणिदुर्गादिकंतस्मात्त्वमेवनियम्यवशीकृत्यपेनकामंहिनिश्चयेनप्रजहिप्रकर्षेणनाशयपतिरिंदुगोदीस्थापत्नीकृत्यैवतस्थेसामंतंकृंतिराजानस्तहृत्वहैन
यत्वेहेतुःपाप्मानंअनुपन्नंतत्रापिहेतुःज्ञानविज्ञाननाशनमितिज्ञानस्यशास्त्राचार्योपदेशजस्यपरोक्षस्वनिदिध्यासनपरिपाकाजस्यापरोक्षस्यचनाशनं ४१ नकेवलंवाह्येंद्रियजयेनैवकृतार्थत्वंकिं
तुमनोबुध्योरपिजयःकर्त्तव्यःकामस्यसमूलोच्छेदायत्रिप्राकारकदुर्गस्थस्यसामंतस्येवाभ्यंतरप्राकारद्वयजयेवे अतोमनोबुध्योर्जेयार्थंयोगंदर्शयतिइंद्रियाणीतिअत्रपरत्वंसूक्ष्मत्वेनचवोध्यं
इंद्रियाणिचक्षुरादीनिपराणिस्वविषयेभ्यःपृथिव्यादिस्वाश्रयसहितेभ्योगंधादिभ्योदिव्यपुत्रशरीरेभ्यस्तेषांतत्कारणत्वात्तथाचकौषीतकिनःसमामनंतिप्राणोभ्योदेवादेवेभ्योलोकाइति
रंतीत्यनुषज्यतेप्राणोभ्यइंद्रियेभ्यःदेवास्तदधिष्ठातारःशोदेवताःउत्पद्यंतेदेवेभ्यस्वलोकाःभूतिभौतिकाउत्पद्यंतेइतिश्रुत्यर्थःइंद्रियेभ्यःपरंमनःमनसोस्वविषयप्रवृत्तिमनसाह्येवशृणोतीतिश्रुतेरिंद्रिया

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ४१ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२॥

णांमनोविकारत्वात्तेनवास्यार्थेभ्यइंद्रियाण्याकृष्यमनसिप्रविलापनीयानीतिदर्शितंकेवलंपरत्वमात्रप्रतिपादनेप्रयोजनाभावात्मनसस्तुपराबुद्धिस्तस्माद्बाह्यस्तस्मान्मनोमयात्
अन्योऽन्तरआत्माविज्ञानमयइतिश्रुतेःमनसःप्रविलापनंतत्कारणेबुद्धौकर्त्तव्यमित्यर्थःसमष्टिबुद्धेरप्यंतर्वांतर्भावःयोबुद्धेःपरतस्तुसःयस्तुशब्दोभास्यवर्गात्बुद्ध्यादेर्भासकस्य
ज्ञानस्यवैलक्षण्यंगमयतियोबुद्धेरपिपरतःसज्ञानपदाभिधेयःकामेनआवृतइतिव्यवहितेनसंबंधःतथाचश्रुतिःयच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनिज्ञानमात्मनिमहति
नियच्छेच्छांतआत्मनीतिएतदुक्तंभवतिवागादिवाह्येंद्रियव्यापारमुत्सृज्यमनोमात्रेणावतिष्ठेततन्मनोपिविषयविकल्पाभिमुखंज्ञानात्मशब्दोदितायांबुद्धौधारयेत्तामपिमहत्या
त्मनिसमष्टिबुद्धौधारयेत्तउक्तेनमहांतमात्मानंशांतेनिष्कलेपरस्मिन्ज्योतिषिप्रत्यगात्मनिधारयेदिति ४२ ॥ ॥ ४२ ॥ ॥४२॥

पेगापत्तमाहसर्वमिति आत्मानं मनः द्राहोकाशेपितथानित्या नकामात्कामपमानंश्रूयतेहि ब्रह्मविद्यायांहाद्गेकामंप्रत्यञ्चांसेहास्तिपत्र नास्तिसर्वेतद् आगत्याविंदत इतितत्रत्पानोकामानांतेषां
चतद्वैमसत्याः कामा इतिश्रुतेः आत्मानं मनः आत्मना मनसैव बुध्यैववासंस्तभ्य निहत्य कृत्वाबुद्धेः परं परमात्मानं बुद्ध्वा समलक्षांतं कामरूपं शत्रुं शातयित्वा रंजहि नाशय हे महावाहो इति संवो
धयन तन्नाशेतवसामर्थ्यमस्तीति दर्शयति अयमर्थः यावत् काममूलस्य अज्ञानस्योच्छेदः आत्मतत्त्वज्ञानेन नक्रियते तावत्पर्यंतं कामस्य निर्मूलोच्छेदो न भवतीति बुद्धेः परं बुद्ध्वा कामो ना
शनीयः तस्मिंश्च नष्टे संसारासारत्यंतोच्छेदो भवतीति दुरासदं परबोधनं विना दुःखेनापि नाशयितुमशक्यं उपायकर्मनिष्ठा तत्प्राधान्येनोपसंहृतं उपयाज्ञाननिष्ठत्वं तद्गुणत्वेन कीर्तिताः
॥४३ इति नैलकंठीये भारतभावदीपे भीष्मपर्वणि प्रकाशे भगवद्गीतासूपनिषत्सु तृतीयोध्यायः अध्यायद्वयोक्तेर्थे प्रामाण्यप्रकाशमाभूदिति विद्यावंशसंप्रदाय आत्मानश्च भ्रममविप्रलंभकत्वा

एवंबुद्धेः परंबुद्ध्वा संस्तभ्यात्मानमात्मना जहि शत्रुं महावाहो कामरूपं दुरासदं ४३ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जु
नसंवादे कर्मयोगो नाम तृतीयोध्यायः श्रीभगवानुवाच इमं विवस्वते योगं प्रोक्तवानहमव्ययं विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

दिनिंसायैश्वरत्वं [illegible] सर्वज्ञत्वं च दर्शयति इममित्यादिना इमं सांख्ययोगं कर्मयोगरूपोपायसहितं संन्यासमिति भाष्यं इमं संध्योपासनादि निर्विकल्पकसमाध्यनुष्ठानांतं कर्मयोगं
ज्ञाननिष्ठोपसर्जनं पारिव्राज्याधिकारिणां राज्ञामेव योग्यं विवस्वते सूर्याय मंडलाभिमानिने सर्वेषां क्षत्रियाणामादिभूताय अहं आदित्यांतर्यामी य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हि
रण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा काप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नामेत्यादिश्रुतिभ्यः प्रोक्तवान् पुरा अव्ययं अविच्छिन्नसंप्रदायं तेनानादित्वम
पि मनवे स्वपुत्राय विवस्वान्प्राहात् इक्ष्वाकवे मनुः स्वपुत्राया ब्रवीत् १ ॥ ॥ १ ॥ ॥ १ ॥ १ ॥ १ ॥

एवमितिएवंपरंपराप्राप्तंइक्ष्वाकोर्निमि दिक्रमेण राजर्षयः जनकाजातशत्रुकैकेयप्रभृतयोराजानः ऋषयश्चसनकवसिष्ठादयः स्वार्थेदर्शिनस्तेराजानएवच्चऋषयइतिवा अविदुर्ज्ञातवंतःमि
जभ्यस्तविच्छिन्नइत्वेतिलडि भेर्तुस्तनष्टः अदर्शनंगतः २ सइतिअद्यसंप्रदायविच्छेदसमतिभक्तःशरणागतःसखाप्रीतिविषयः रहस्यंगोप्यंअभक्ताद्भिन्नानदेयं अन्यथानिर्वीर्यविद्याभवेदित्यर्थःतथाचसं
अवर्णः विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि असूयकानजवेयतानमाकृपावीर्यवतीतथास्यामिति ३ भगवदेहस्यवसदेवादुत्पत्तिंमन्वानोर्जुनउवाच अपरमितिअपरं अर्वा

इमंपरंपराप्राप्तमिमंराजर्षयोविदुः सकालेनेहमहतायोगोनष्टःपरंतप २ सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ३ अर्जुनउवाच अपरंभवतोजन्मपरंजन्मविवस्वतः कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ४ श्रीभगवानुवाच बहूनिमेव्यती
॥तानिजन्मानितवचार्जुन तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ५॥

क्कालिकंपरंबहुकालिकंविजानीयांयद्यपिशब्दाद्यमर्थोज्ञातःतथापिविरुद्धार्थस्यवाक्यस्याबोधकत्वात्कथमेतद्विजानीयामित्युक्तंपदयोजनास्पष्टा ४ स्वदेहस्याजत्वंसाधयितुंस्वस्यस
॥र्वज्ञत्वंतावदाहबहूनीतिस्पष्टार्थश्लोकः ५॥

कितर्हि येषिनांसर्वज्ञप्रसिद्धेस्त्वं जातिस्मरोजीवोसीत्याशंक्याह अज इति देहान्निष्कृष्टस्याजत्वाव्ययत्वेन त्वेवाहं जातु नासमित्यत्र साधितेष्वपि देहविशिष्टस्यैव तदुच्यते ईश्वरोपीत्यनेन देहान्निष्कृष्टस्या
स्मदादेरपीश्वरत्वं तत्त्वमस्यहं ब्रह्मास्मीत्यादिश्रुतिसिद्धमतो देहविशिष्टस्यैवाजत्वमिति नित्यत्वे हठी क्रियेतेऽन्यथानीश्वरत्वप्रसंगात् तन्नादित्यांतर्यामि ण्यस्येश्वरस्य हिरण्यश्मश्रुत्वादि वि
शिष्टे देहो जन्मव्ययवानिति वक्तुं शक्यं अकर्मजत्वात्कर्मफलस्य हि पराकाष्ठा हिरण्यगर्भशरीरप्राप्तिः न पुरुषो ह वै नारायणोऽकामयत अत्यतिष्ठेयं सर्वाणि भूतानि अहमेवेदं सर्वं स्यामिति
स एतं पुरुषमेधं पंचरात्रं यज्ञक्रतुमपश्यत् इत्यादिना शतपथे नारायणाख्यस्य परमात्मनः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलमिति पादोस्य सर्वा
भूतानि त्रिपादस्यामृतं दिवीति च पुरुषसूक्तप्रतिपाद्यस्य सर्वाणि भूतानि अतिक्रम्य स्थितस्येश्वरस्यापि शरीरं पंचरात्राख्यकर्मविशेषफलमिति श्रूयते इति वाच्यं तत्र नारायणशब्दे

दि२

अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ६॥

न हिरण्यगर्भस्यैव विवक्षितत्वात् न हि परमेश्वरस्य पूर्णकामस्य सर्वान् अतिक्रम्य स्थितस्य पुनरत्यतिष्ठेयं सर्वाणि भूतानीति कामना संभवति न तु परमेश्वरेपि कामना दृष्टा सोऽकामयत बहुः
स्यां प्रजायेयेति तिचेत्त्वश्लाघनीयप्राज्ञो देवानां प्रियो यतः आप्तकामस्य का स्पृहेति श्रुतेर्लोकवत्तु लीलाकैवल्यमिति न्यायाच्च निस्पृहस्य लीलयैव ब्रह्मांडकोटीः सृजतो भगवतो
राजगोपालस्य सर्वं किं करेण कर्मणा सर्वोत्कर्षं प्रार्थयतामस्माकं न्यायाद्यति तस्मान्न कर्मफलं भगवतः शरीरं अत एव न भोगे ति के विराट्सूत्रात्मा ति रिक्तस्य भोक्तृकस्याभावात् तस्माद्युक्तं
अजोपि सन्निति न नु तर्हि भगवच्छरीरस्य किंसुपादानं अविद्येति चेत् परमेश्वरे तदभावात् जीवाविद्या चेत् शुक्तिरजतादेरिव तुच्छत्वापत्तेः चिन्मात्रं चेत् न चित्साकारत्वायोगात् तथात्वे वा तस्यां
॥तीद्रियत्वापत्तेस्तस्मात्किमालं॥

वनोयंभगवद्देहो देवकीगर्भप्रवेशजननबाल्यकौमारपौगंडयौवनादिप्रवृत्तिविषयस्तिचेत्प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति अयमर्थः जीवात्मानो हि अनात्मभूतां प्रकृतिं
तेजोबन्नात्मिकां पंचभूतात्मिकां वा अधिष्ठाय संभवंति जन्मादीन् लभंते अयं तु स्वां प्र स्मगान्यां प्रकृतिं प्रत्यक्चैतन्यमेवेत्यर्थः तदेवाधिष्ठायनतदुपादानांतरं आत्ममायया मायया स्वीयया
मायया संभवामि यथा कश्चिन्मा यावी स्वयं स्वस्थानादप्रच्युतस्वभावोपि अहं श्यामलस्थूलसूक्ष्म तान्यनुपादाये वं केवलया मायया स्थितिमायाविनं स्वदेशमेव स्वमन्त्र मायो
गा गगानमारोहंतं संतिएवमहं कृष्ण चिन्मात्रो अनात्मः स्वमायाय चिन्मयात्मनः शरीरं सजामितस्यबाल्याद्यवस्थाश्च मत्तारोहणवदृश्येयामि एतावांस्तु विशेषः लौकिकमायावी
मायामुपसंहरन् हि तिष्ठंमायाविनमेष्युपसंहरति अहं तु तामनुपसंहरन्नस्वविग्रहमपि नोपसंहरामीति एवं हि सति हिरण्यश्मश्रुत्वादिलक्षणविग्रहे योगिनश्चेतनस्याद्यंतत्त्वहूमो
पदेशादित्यादि न्यायसिद्धं विग्रहाद्युपादानत्वलक्षणं सर्वैश्वर्यं संयुज्यते नान्यथेति तस्मात्सिद्धं परमेश्वरस्य मायामयं शरीरं नित्यमिति एकैनेव देहेन विवस्वतमुपदिश्य त्वामप्यु
पदिशामीति अन्यत्र पि नित्यैव सा जगन्मूर्तिरिति सावधारणा प्रतिज्ञायते देवानां कार्यसिध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्याप्यभिधीयत इति नित्याप्या
प्य विर्भावापेक्षया स्वर्यस्यैव बाल्यादिकं उत्पत्त्याद्युपगम्यते भाष्ये तु स्वां प्रकृतिं वैष्णवीं त्रिगुणात्मिकां मायां अधिष्ठाय वशीकृत्य आत्ममायया संभवामि देहवान् जातइवात्मनो मा
॥यया न परमार्थतो लोकवदिति व्याख्यातं ६॥

कदासंभवतीत्यपेक्षायामाह यदेति ग्लानिर्ह्रासः अभ्युत्थानं वृद्धिः ७ किमर्थमायया त्वं जसीत्यत आह परित्राणायेति दुष्कृतां दुष्टं कर्म कुर्वतां पापिनां नाशाय च संभवामि आविर्भवामि ८ तन्मे या मप्रकर्म साधुत्राणादि दिव्यं अलौकिकं तं यो वेत्ति स त्यक्त्वा देहं पुनः जन्म न प्राप्नोति किंतु मामेति मामेव प्राप्नोति एतेन भगवतो जन्मानि कर्माणि च भगवत्प्राप्तिकामेन गेयानीति द र्शितं ९ एतस्यापि भगवत्प्राप्तिहेतुरित्याह वीतेति रागो विषयेषु प्रीतिः भयं स्यो च्छेद शंका क्रोधः स्वपरपीडा हेतुरभिज्वलनं नेत्रयोर्वीता एभ्यस्ते वीतरागभयक्रोधाः अत एव मन्मयाः मद्

मोह

मथ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं ७ परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे ८ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ९ वीतरागभयक्रोधा मन्मया मामु

॥पाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः १०॥

कतथा नाः किं जारिणीय यथा जारमपि भर्त्तारं चाश्रिता यो गक्षेमार्थं तद्वन्नेत्याह मामुपाश्रिताः ज्ञानतपसा ज्ञानमयं तप आलोचनं मम जन्मकर्मणोः स्वरूपस्य च निरंतरं चिंतनं य

॥स्य ज्ञानमयं तपः इति प्रसिद्धं ज्ञानतपः तेन पूताः संतो मद्भावं मत्तादात्म्यं प्राप्ता इत्यर्थः १०॥

ननु साध्वसाध्वोस्त्राणविनाशौ कुर्वतस्तव वैषम्यं नैर्घृण्यं स्यातां किं त वाऽस्मदादितुल्यस्य जन्मकर्मणी स्यातां स्वरूपाणां विचिन्तनेनाशं क्याह्ये ये यथेति ये मनुष्या मां सर्वेश्वरीरसं यथा येन प्रकारेण
शत्रुत्वेन मित्रत्वेन वा प्रपद्यन्ते प्राप्नुवंति तान्तेनैव प्रकारेणाहमपि भजामि अनुसरामि येतु मम वर्त्म भक्तिध्यानप्रणिधानात्मकमनुवर्त्तन्ते तान्मम आत्मभक्तान्तथैव सर्वशः सर्वैः प्राकारैरनु
वर्त्तेऽहमिति योजना ततश्च यम्मर्हं वभते प्राणिजातं येऽयथा प्रीतिं द्वेषं वा करोति तस्मिन्प्रतिबिंबभतेऽहमपि तथैव प्रीतिं द्वेषं च करोमि विविप्रजापरिभवो प्रतिविवेसेक्रमते तान मम वैषम्यं नै
र्घृण्यं च स्तस्मात्श्रेयोऽर्थिनाम सर्वस्य कल्याणे एव यतितव्यमिति भावः आश्रित्य ये यथा येन प्रकारेणाये न प्रयोजनेन आर्त्ता जिज्ञासवोऽर्थार्थिनो ज्ञानिनो वा प्रतिपद्यन्ते तांस्तथैव पीडा

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ११ कांक्षन्तः कर्मणां सिद्धिं
यजंत इह देवतां क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा १२ ॥ ११ ॥ १२॥

परिहारेणाज्ञानदानेन मोक्षदानेन वा अनुगृह्णामि सर्वथा ते ममैव वर्त्मानुवर्त्तन्त इति अन्यदेवताभक्ता अपि ममैव भक्ता इति चेत्तथाच स्मृते ११ कांक्षन्त इति हि यस्मात्मानुषे लोके कर्मजा सि
द्धिः काम्यकर्मफलं पुत्रपश्वादिकं क्षिप्रं भवति न तु निष्कामकर्मजा चित्तशुद्धिः अतो ये कर्मणां सिद्धिं फलं इह वाञ्छन्तः कांक्षन्तः कांक्षमाणाः देवताः इन्द्रादीन्यजन्ते तेऽपि ममैव मार्गं वर्त्मानु
॥ वर्त्मानुवर्त्तन्त इति पूर्वेणान्वयः व क्षान्तिर्यस्य अन्यदेवताभक्ता इत्यादि १२॥

सार

अन्यदेवताभक्ता अपि कस्मात्पुनः कारणात्तवैव वर्त्मानुवर्तन्ते नान्यस्येत्यत आह चातुर्वर्ण्यमिति चत्वारो वर्णा एव चातुर्वर्ण्यं गुणाश्च कर्माणि चेति गुणकर्मद्वंद्वैकवद्भावः कर्माणि अग्निहोत्रादीनि गुणाश्च पूज्यदेवतादिरूपाः विभागशः साधारणासाधारणविभागेन तथाहि स्नानजयादिकं सर्वेषां रणं अग्निहोत्रादिकं त्रैवर्णिकस्यैकस्यैव शूद्रस्य राजसूयादिकं राज्ञ एवं तरेषामिति विभागो दृश्यते यतश्चातुर्वर्ण्यं गुणकर्म मया सृष्टं ततो अन्यदेवतानामपि मत्तुल्यत्वात्पुत्रप्रीत्या पितुरिव तत्प्रीत्या ममैव तत्प्रीतिरस्तीत्यर्थः यद्वा गुणविभागशः कर्मविभागश इति योज्यं तथाहि सत्त्वप्रधाना ब्राह्मणाः तेषां कर्म शमदमादिकं सर्जनरजःप्रधानाः क्षत्रियाः तेषां कर्म शौर्यादि तमसंउपसर्जनरजःप्रधाना क्षत्रियाः तेषां कर्म शौर्यादि तमउपसर्जनरजःप्रधाना वै

॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं १३ ॥

श्यास्तेषां कर्म कृष्यादि रजउपसर्जनतमःप्रधानाः शूद्रास्तेषां कर्म शुश्रूषणं चेति गुणकर्मविभागो दृश्यते तथा चातुर्वर्ण्यमिति स्वार्थे ष्यञ् चत्वारो वर्णा गुणकर्मविभागशो मया सृष्टा इत्यर्थः अन्यदेवताभक्ता अपि मदुक्तकर्मकारित्वान्मद्भक्ता एवेति भावः ननु यद्येवं त्वं स्वसंततितत्परेण न स्वाज्ञाकरणेन प्रियसेतदर्थं च त्वया चातुर्वर्ण्यं सृष्टं इति हि महान् संसारी

॥ त्वमसीत्याशंक्याह तस्येति कर्तारं मायायोगात्तद्वस्तुतोऽकर्तारं अत एवाव्ययं अविकारिणं १३ ॥

पा २

नतु कर्तुरपि कथमकर्तृत्वमत आह न मामिति कर्मलेपोपि अतो नास्तीत्यत आह न मे इति यः कर्तृत्वाभिमानी स लिप्यते यस्तु शुद्धः स एवात्मनः कर्तृत्वं मन्यत इति फलेच्छाभावात् कर्त्तोऽकर्तृत्वा
च्च न लिप्यते यः इति मां योऽभिजानाति स कर्मफलस्पृहात्यागात् कर्मभिर्न निबध्यते १४ एतत्स्वशिष्टाचारप्रदर्शनपूर्वकं माहयति एवं ज्ञात्वेति पूर्वतरैर्वेदोक्तत्वात् न तु लक्षणाकेन कल्पितमित्य
र्थः पूर्वैः पूर्वतरं प्रथमतरं कृतं आत्मावश्यकत्वादिति भावार्थः १५ अवश्यकर्तव्ये यत् कर्मणि अवगतानुगतिकतया अनुष्ठानं कर्तव्यं किं तु ज्ञात्वा कर्माणि कुर्वीतेति वचनात् कर्मचिन्तनं किं चित् हि प्रोक्तमा
पयितुं उपोद्घातयति किं कर्मेति यतः कर्माकर्मणी कवीनां अपि दुर्निरूप्यत्वं तस्मात्ते तुभ्यं कर्मेत्यकर्म वा कारप्रश्लेषेण गम्यतां तत्ते प्रवक्ष्यामि यत् ज्ञात्वा अशुभात् संसारात् मोक्ष्यसे १६

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा इति मां योऽभिजानाति कर्मभिर्न स बध्यते १४ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्मात्त्वं
पूर्वैः पूर्वतरं कृतं १५ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १६ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं
॥ च विकर्मणः अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः १७॥

त्रि १

एतज्ज्ञानमावश्यकमित्याह कर्मण इति तत्त्वं बोद्धव्यमस्तीति सर्वत्रापि तत्त्वमस्तीति पदद्वयाध्याहारः कर्मणः शास्त्रविहितस्य विकर्मणः प्रतिषिद्धस्य अकर्मणः तूष्णींभावस्य गहना कर्मणः
॥ इति त्रितयोपलक्षणं कर्म विकर्माकर्मणां गतिर्याथात्म्यं तत्त्वं गहनं १७ ॥

५४

यत्कर्मेत्यादिना तत्त्वं वक्ष्यामीति प्रतिज्ञातं तदाह कर्मणीति कर्मणि कर्म विकर्मात्मके देहेन्द्रियव्यापारे अविद्यया प्रत्यगात्मनि आरोपिते सति तत्र अकर्म कर्माभावं नौस्थेन तीरस्थे रोधे चलने आरोपिते सति तत्त्वधीतत्र चलनाभावमिव यः पश्येत् तथा चक्षुरगच्छन्निमिति न्यायेन त्रिगुणात्मकेषु निर्देहेन्द्रियादिषु नित्यं कर्मैव तस्य पश्यंद्रष्टारं कादौ गमनाभावमिव तत्र ब्रह्मीभूतोहमस्मि न किंचित्करोमीति तत्त्वधर्ये अकर्मणि कर्माभावे कर्मा ख्य प्रपंचं यः पश्येत् स मनुष्येषु बुद्धिमान् तत्त्वदर्शी आत्मनि भोक्तृजनितव्यापारस्य अनात्मनि च तादृशस्य निर्व्यापारत्वस्य वा धात्सरणं च युक्तोयोगी हि त्वं कृत्स्नकर्मकृच्च कर्मयोगफलं तत्त्वज्ञानस्य प्राप्त्वादिति स्तुतिमात्रं आत्मनो कर्तृत्वं संघातस्यैव कर्तृत्वमिति भावयता कर्माणि कर्तव्यानीत्यर्थः यद्यप्येतद्बहुधा प्रपंचितं अयमर्थोयमित्यादौ तथापि तत्त्वस्य दुर्ज्ञेयत्वात् पुनः पुनरुच्यत इति प्राच्यः यत्तु कर्मणि नित्ये परमेश्वरार्थे अनुष्ठीयमाने बंधहेतुत्वाभावात् अकर्म इदमिति यः पश्येत् तथा अकर्मणि नित्य

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८

५९

कर्माकरणे प्रत्यवायहेतुत्वेन कर्म इदमिति च यः पश्येत् स बुद्धिमानिति तद्रसंगतमेव नित्यकर्मणि अकर्म इदमिति ज्ञानस्य शुभमोक्षहेतुत्वाभावात् मिथ्याज्ञानत्वेन तस्यैवाशुभत्वाच्च न चैतादृशं मिथ्याज्ञानं बोधयितव्यं तत्त्वं नाप्येतादृशाज्ञानबुद्धिमत्त्वादि स्तुत्युपपत्तिरिति दिक् यत्तु कर्मणि ज्ञानकर्मणि दृश्ये जडे सद्रूपेण स्फुरणरूपेण वानुस्यूतं सर्वभ्रमाधिष्ठानं अकर्म अवेद्यं स्वप्रकाशं चैतन्यं परमार्थदृष्ट्या यः पश्येत् तथा अकर्मणि स्वप्रकाशे दृग्वस्तुनि कल्पितं कर्म दृश्यं मायामयं न परमार्थसदिति यः पश्यति स बुद्धिमानिति परमार्थदर्शित्वाद्धास्त्वैरेव मुरेत्त यत्तदप्यपि व्याचख्युः तदप्यात् शुत्तरस्य संगतमेव कर्मकुरु कर्मप्रवक्ष्यामीत्यनुष्ठेयकर्मप्रस्तावे तत्त्वज्ञानानवसरात्तत्त्वाधिक तुरीक्षि

॥तमंतर्मेतिपरिभाषिक्याकर्मसंज्ञायाह ॥ ५१

श्पस्य कर्मशब्दार्थत्वं गृहीतं शक्यं तस्याः बुद्धिमानादि संज्ञानाभिरामार्थे निरोपान हेतुत्वादिति संक्षेपः यद्वा कर्माकर्मणी विकल्प्यत्वेन वोढव्यत्वेन चोपक्षिप्यात्र तयोर्लक्षणप्र
दर्शनमुचितं अतो यत्कर्मणा विशेषितं तत्तदेव कर्म नान्यदिति कर्मलक्षणं यच्चाकर्मणा विशेषितं तत्तदेवाकर्मेत्यकर्मलक्षणमिति व्याख्येयं अयमर्थस्तु कर्म यज्ञादिकं साध
नं तत्र चाकर्मस्य दृष्टशून्यं कृत्स्नं ब्रह्म यः पश्येत् कर्मेतदंगेषु ब्रह्मदृष्टिमध्यसेत् यथाहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुतमित्युक्तं अन्यथा यत्वा
तेन तद्दृष्ट्या चेष्टारूपमेवाजोगाहेनाकर्मतो गतिः किं तर्हि कर्मयत्वं मुरूपध्यस्यन्त इत्याकांक्षायां येन तत्कर्म पुण्यपापात्मकं दृश्यते पुण्यपापैर्वैरुपेण कर्मणा भवति पापः पापेनेति तत्
फलं च सुखदुःखादिकं अहं सुखी अहं दुःखीति सप्रत्ययकं चेतनोऽकर्म तच्चैवेदं कर्म अस्य हि स्पष्टात्मकस्य पश्यवाध्यस्तमिति यः पश्येदिति अयं भावः यथा रज्ज्वां मध्यस्तं सर्पं पश्य
न् नायं सर्पो रज्जुरियमिति वाक्यात्तस्य रज्जुत्वं विरूपप्रावल्यात् तदप्रतिपद्यमानो नरः सर्पमिमं रज्जुदृष्ट्योपास्वेति नियोज्यते स चोपासनात् सर्पं विसृज्य रज्जुतत्वमवैति
तिपरस्तु वाक्यादेव रज्जुतत्वं विंदति न तस्य प्रत्ययावृत्तिलक्षणायाउपास्त्या प्रयोजनमस्ति एवं कर्मण्यध्यस्तं कर्त्रादि तत्त्वमसीति वाक्याद्बुध्वा कर्मप्रतिपत्तिर्भवति शु
द्धसत्त्वस्य अन्यस्य तु कर्त्रादीनेवाकर्मदृष्ट्या उपासीनस्य भावनादार्ढ्यात् कर्त्रादिरूपतिरोधानेनाकर्मतत्वप्रतिपत्तिरिति १८ ॥ ॥ १८ ॥ ॥१८ ॥१८

म२

८२

अविदुषां कर्मणः प्रभावानां हृदयस्थितं विदुषां कर्मदर्शनं स्तौतीति यस्य सर्वे समारंभा इत्यादिभिः पंचभिः श्लोकैः सम्यगारभ्यंत इति समारंभाः कर्माणि कामेन फलेच्छया
संकल्पेन च अहं करोमीति अभिमानेन वर्जिताः तेन ज्ञानाग्निना कर्माणि शब्दकर्मादिरूपेण ज्ञानेन दग्धानि अकर्मीभावात् अचितानि कर्माणि शुभाशुभानि येन तं पंडितं बुधा
आहुः १९ ननु प्रायश्चित्तेनेव ज्ञानाग्निना पूर्वकर्मदाहेपि क्रियमाणं तत्फलाय भवेदित्यत आह त्यक्त्वेति आत्मलाभेन नित्यतृप्तः अतएव फलासंगं त्यक्त्वा कर्मणि
लौकिके निराश्रयः अहंकाराद्याश्रयरहितः कर्मण्यभिक्रियते निराश्रयो निरहंकारो यस्मात्ततो कर्मासंगं अहंकरोमीति अभिमानं च त्यक्त्वा कर्मणि लौकिके वैदिके वा अभि
प्रवृत्तः संयोगोपसंगहो रागप्रवृत्तोपि मनसा न किंचित्करोतीति अतो तस्य क्रियमाणमपि कर्म न फलाय भवतीत्यर्थः २० नन्वेतस्माद्गुणात्कर्माकरणात् केवलं मुख्यमेव

पि१

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १९ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्य
भिप्रवृत्तोपि नैव किंचित्करोति सः २० निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं २१ २१४२

यति

च्चस्याः फलमाह युंजन्निति एवमेतेन प्रकारेण सर्वदा निरंतरं दीर्घकालं सत्कारात्मानं मनो युंजन् समाधौ स्थापयन् योगी नियतं आनि फलाशंपि निगृह्णीतं मानसं येन
स स नियतमानसः शांतिं परवैराग्यबलात् ख्यातिमपि निरुध्य निर्विकल्पसंप्रज्ञातनिर्वाणं मोक्षलक्षणं परमं निष्ठा यस्याः शांतेः तां मत्संस्थां मय्येव संस्थितां एकीभाव
नावस्थानं समाप्तिर्वा यस्यास्तां अधिगच्छति मां प्राप्नोतीत्यर्थः फलं च सर्वज्ञतादि शितं प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिरि
ति तत्संपुरुषख्यातेर्गुणा वैतृष्ण्यमिति मत्वा पुरुषान्यता ख्यातिमात्रस्य सर्वे ता तत्वे सर्वभावाधिष्ठातृत्वं चेति प्रसंख्यानेप्यकुसीदस्य वागिनरवफ

युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ नात्यश्नतस्तु योगोस्ति
न चैकांतमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य
योगो भवति दुःखहा १७

लानिर्लोः सर्वथा विवेकख्यातिरेव भवति तस्माच्च फलं धर्ममेघः समाधिः सत्वप्रयोगव्यायात् तत्वत् हेगगर्पंवरंपरसंज्ञं पुरुषख्यातेः फलं तस्य ल
क्षणं [illegible] लक्षणेषु दिव्यादिव्यविषयेषु वैतृष्ण्यं एतस्मैव हि निर्नातरीयकं फलं कैवल्यमिति योगावरेति तृतीयपादे तत्र फलं सार्वज्ञादिकं तु अभि
मे तस्य पूर्वतेकस्य भगवतां विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वेस्वरेशी सर्वस्येशानः सर्वस्याधिपतिरित्यादिकं १५ एवं योगाभ्यासनिष्ठस्याहारा
दिनियमो दृढाभ्यानां सत्प्रत इति एकांतं अतिशयेन अतिजाग्रतस्तथात्यतिशयेपोस्यः १६ युक्ताः परिमिताः आहारस्यापि उपस्नातथा १७

निर्वाणपरमांशांतिंमत्संस्थांमद्रूपेणावस्थितांप्राप्नोतिस्थितिरिभिर्यद्दिः विनियतंविशेषेणएकाग्रतांप्राप्तमपि नियतंचित्तंयदात्मन्येवावतिष्ठतेनतदास्मि
तादिस्पृहारहितःउच्यतेतदायोगीसर्वेभ्यः कामेभ्यःसस्वबीजसमाधिभूमिस्थितेभ्यः पंचमीसर्वात्मप्रोक्षवतामप्याप्तेषुनिस्पृहोभवतितदायुक्तो
निर्विकल्पइत्युच्यते १८ एकाग्रतावच्छायायोगिनश्चित्तस्योपमामाहयथेति नेंगते चलतितदनुरूपतंचतस्थितं तत्स्वएकाग्रतांप्राप्तचित्तंनिवातप्रदीपवच्चंचलं
नोद्यः आत्मनोयोगंसमाधियुंजतोनैष्ठिकस्य १९ यत्रेतिएवंमेकाग्रीभूतंचित्तंमतयोगसेवयानिरुद्धं यत्रयस्यामवस्थायांउपरमतेविलीनंभवतियत्रचात्मना

यदा विनियतं चित्तमात्मन्येवावतिष्ठते निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८ यथा दीपो निवातस्थो नेंगते
सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९ यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं
पश्यन्नात्मनि तुष्यति २० सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः २१ २१

त्मनाचित्तेनआत्मानंनिर्विकल्पंपश्यन्नात्मनितुष्यतिनचान्येष्वर्थेषुतुष्टिंभजते २० किंचसुखमितिआत्यंतिकंअनंतंयत्सुखंतत्केवलंबुद्ध्या
त्यंसोऽक्षुसुखवत्तपतोऽतींद्रियं इंद्रियागोचरंयत्रस्थितोयंन [illegible] वेत्तिविषयाभावात्नकिंचिदनुभवतिनापितत्त्वतश्चलतिबुद्धितादात्म्या
भावात्कालेचलतीवेतिभातिपरंतुतत्त्वतोनचलतितथाचश्रुतिःध्यायतीवलेलायतीवेतिवशात्वृअयंयुंजानाध्यानादेरतात्विकत्वंदर्शयतिबुद्धे
ध्यायत्यांध्यायतीवेतिलेलायत्यांलेलायतीवेतिश्रुत्यर्थः [illegible]तत्सुखपश्चापंवेत्तिअनुभवतीतिसंबंधः यत्रेत्यादिभिस्त्रिभिर्वाक्यं २१ २१॥

भी० १०५

६२

दुःखेनशस्त्रनिपातादिलक्षणेनगुरुणामहता २२ तमितियत्रोपरमतेचित्तमित्यादिनोक्तलक्षणा।। तं दुःखसंयोगस्यापि यन्तः कारणत्वं वियोगमे
वसंतं विरुद्धलक्षणायोगसंज्ञितं वियोगयोगफलमुपसंस्मस्य पुनर्निश्चयावेद्यः साधनत्वविधानपूर्वकं तमेव ज्ञात्वा शेषं चदितव्यामितिमायेन
विधत्तेमहस्तादिनामयोगः निश्चयेनअध्यवसायेन अनिर्विण्णेनिर्वेदरहितेनचेतसायस्येतनयोक्तव्यो अभ्यसनीयः यद्वाशांतोदांतउपरतस्तितिक्षुःसमा
हितोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतिविहितंमुमुक्षुस्यमुक्तावित्तपरोपदेशमात्रिषद्कमत्रक्रमतोविधीयतेतत्रनिश्चयेनेतिगुरुवेदवाक्यादौ

योग० १

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते २२ तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं स
निश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा २३ संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः मनसैवेंद्रियग्रामंविनियम्यसम
मंततः २४

फलावश्यंभावनिश्चयलक्षणाश्रद्धोक्तनिश्चयपदेनगृह्यतेयानिर्विण्णचेतसेतिवैराग्येणाद्वंद्वसहिष्णुलक्षणातितिक्षाविधीयतेतितैत्रेयं २३
अथशमदमोपरमसमाधानानिक्रमेणश्लोकद्वयेनविधत्तेसंकल्पेतिसंकल्पःइदंमेभूयादितिचेतोवृत्तिःततउद्भवोयेषांतान्कामान्विषयानशेषतोवा
सनोच्छेदपूर्वकंसंकल्पनिरोधेनसत्यक्त्वातेनांतरिंद्रियनियहलक्षणःशमउक्तःबाह्येंद्रियनिग्रहलक्षणंदममाहमनसैवेतिविषयदोषदर्शिनामनसैव
सर्वतःसर्वेभ्योकोरणश्रोत्रादिकमिंद्रियग्रामंततः सर्वेभ्योविषयेभ्योउपरमेदित्युत्तरेणान्वयः २४ ४४ ।। श्रीगणपतीरामजी ।। ४४ ।।

रामं०
१०५

दि॰व्या॰१ गी॰३

शनैः शनैरिति भूमिकाजयक्रमेण न सहसा विषयेभ्यः उपरमेत आवृत्तो भवेत् नक्कयं धृतिगृहीतया बुद्ध्या भूमिः धृत्या पयाधारयते मनःप्राणेन्द्रियाः योगेनाव्य भिचारिण्या धृतिः सा पार्थ सात्विकी तु या स्वरागृहीतया वशीकृतया बुद्ध्या उपरमेत तथापि एवमुपरतं मनः आत्मनि स्वरूपे संस्थाप्य न तु दृश्ये दृष्टरि कातत्रथा आत्मैकाकारमेकाग्रमित्यर्थः दृष्टृदृश्योपरक्तं चित्तं सर्वार्थं सर्वाकारधेतयाः कृपा हृदया चित्तस्यैकाग्रता परिणाम इति स चित्ते मैकाग्रं प्रापयेत् सत्य आर्थस्तु अह मिदं पश्यामीत्यनुभवसिद्धं द्रष्टादृश्यं दर्शनं च भासते तत्र दर्शनभानमप्रमाणेव मतो दृष्टरि दृश्ये चोपरक्तं चित्तं सर्वार्थमित्यनेन तु दर्शनोपरक्ततापि सर्वार्थतायां गोता तस्मात् एव चित्तस्य नाशापत्तेः दृष्टृदृश्योपरागाभावस्य कार्यतत्तु अतेयया स्वमतत्र तदृश्यं नास्तीति पामराणामपि प्रसिद्धं द्रष्टापि नास्तीति तदा इन्द्रियाणा

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् २५

मभावात् आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः भोक्तृत्वस्येन्द्रियमनःसंनियोगशिष्टत्वात् किंतु दृष्टृदृश्योपरागेण कारयति तद्वासनावासितत्वात् एवं सति य दासर्वार्थतायाः क्षयः सर्वार्थस्यैकार्थतायाः उदयश्च तदा चित्तस्यैकाग्रतारूपः परिणामो भवतीति तदेवमात्मसंस्थं मनः कृत्वेति संप्रज्ञातसमाधिरुक्तः तत्रापि पूर्वाभ्यासवशात् चित्तस्य दृष्टृदृश्योपरागोवासनामयो भातीति तन्निवारणेनासंप्रज्ञातसमाधिमाह न किंचिदपि चिंतयेदिति ध्यातृध्यान ध्येयविभागमपि न स्मरेत् किंतु अखंडैकरसमेव विज्ञात्मनात्मसु भवतिष्ठेदित्यर्थः २५

दृष्टदृश्यवासनावासितं चित्तं पटसदृशमेकं मनणवास्तित चक्रस्थं यज्ञोतिपापु रुषेण साम्यमापन्नेजाग्रत्स्वप्नेपि ४

शनैरित्येतत्स्पष्टयति यतो यत इति त्रिभिः यतो यतो हेतोर्यं यं विषयं प्रति ह्येतुं मनो निश्चरति बहिर्गच्छति चंचलत्वात् ततस्ततो विषयात् एतन्मनो निय
म्य प्रत्याहृत्य आत्मन्येव स्वरूपेण वशं नयेत् पर्यवसाययेदित्यर्थः एतेन पूर्वार्धं व्याख्यातं २६ एवमात्मवशे मनसि किं स्यादित्यत आह प्रशांतेति द्वियम्यां ततः एनं प्रशांत
मनसं प्रशांतरागादिविषयाभिलाषात् शांतरजसं प्रक्षीणमोहादिक्लेशरूपकं रागादिरूपरजस्तमसंयोगिनं एकाग्रताभूमौ उत्तमं सुखं संप्रज्ञातसमाधिफलभूतं उपै
भीति तिष्ठति ... [illegible] ... शांत [illegible] रजसं ब्रह्मभूतं सद्वस्तुरूपं अकल्म
षं धर्माधर्मवर्जितं ... योगमभ्यस्य ... युंजयति कर्मबंधनानि ... निरोधमभिमुखी करोति ... ततो योग इत्या

यतो यतो निश्चलति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २६ प्रशांतमनसं ह्येनं योगि
नं सुखमुत्तमं उपैति शांतरजसं ब्रह्मभूतमकल्मषं २७ युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्प
र्शमत्यंतं सुखमश्नुते २८ रामजी रामजी

ख्यायत इति एतेनात्मसंस्थं मनः कृत्वेति व्याख्यातं २७ अस्य फलमाह युंजन्निति एवमनेन प्रकारेण योगी आत्मानं मनो युंजन् समादधानः विगतक
ल्मषो निरस्ताविद्यादिक्लेशः सुखेन अनायासेन ब्रह्मसंस्पर्शं निर्विशेषब्रह्मणा स्पर्शं विविधोपाधिनिर्विलयात् अश्नुते प्राप्नोति कीदृशं ब्रह्मसंस्पर्शं अत्यंतं
तं द्रष्टृदृश्यभावेन परिच्छेदः तमतिक्रांतं निर्विशेषं सुखं परमानंदैकरूपं एतेन निर्विकल्पकचिंता ... इति चतुर्थपादो व्याख्यातः २८ रामजी ४४ ॥४४

द्विविधस्यापियोगस्यफलमाहसर्वेतिसोपाधिनिरूपाधिभेदेनब्रह्मविदुक्तेसोपाधिकःस्यात्सर्वात्मानिरुपाध्योऽनुपाधिकइतिवार्त्तिकोक्तेरसा
संप्रज्ञातेस्यात्मनःसर्वात्मत्वमनुभवन्योगीसर्वभूतेषुउपाधानतयास्थितंस्वात्मानंईक्षतेपश्यतितथासंप्रज्ञातेसर्वाणिभूतानिब्रह्मादिस्तंबपर्यंतानिस्वात्मन्येक
तांगतानिस्वाप्निकवाध्यस्तसर्पदंडधारादीनिरज्जुमिवपश्यति। योगयुक्तात्मायोगेनसमाहितचित्तः असंप्रज्ञातावस्थामाहसर्वत्रेतिसर्वेषुब्रह्मादिस्थावरांतेषुविषमेषुभू
तेषुसमंनिर्विशेषंब्रह्मात्मैकत्वविषयंदर्शनंयस्यससर्वत्रसमदर्शनः तथाचश्रुतयः यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति सर्वभूतेषुचात्मानंततोनविजुगुप्सते सर्वस्यात्मा

भवतिप्र...

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः २९

तत्रवाउत्तरार्द्धंसर्वंपदद्वयमात्मेसाद्यएतमर्थंप्रतिपादयंतीत्यन्येयोगयुक्तात्मायोगीवासर्वत्रसमदर्शनःसन्नात्मानमीक्षतइतियोगिसमदर्शिनावात्मेक्ष
णाधिकारिणावुक्तौयथाहिचित्तवृत्तिनिरोधःसाक्षिसाक्षात्कारहेतुःतथाजडविवेकेनसर्वानुस्यूतचेतनस्यपृथक्करणमपिनोचेत्स्याद्योगस्यज्ञानापेक्षितइतितत्रसमा
हितोभूत्वात्मन्येवात्मानंपश्यतिततस्तुतंपश्यतिनिष्कलंध्यायमानः इत्यादिश्रुतिभिःसमाधिध्यानावधिपर्यायैरप्यात्मदर्शनहेतुत्वप्रतिपादनात्तत्कारणंसांख्य
योगाभिपन्नंद्वितयमेतंयोगविधिंचकृत्स्नमितिलिंगाच्चज्ञानयोगयोःसमुच्चयावगमात्तत्त्वश्चेतोतयोःक्तिकविवेकमात्राज्ज्ञानरागयोःदेहात्मनोःपृथक्क
रणंभवतिसोपाधिकस्यभ्रमस्यउपाधिनिवृत्तिमंतव्यानिवृ

तर

पवो ३

आनाति २

न संभवात् तस्यादर्शनायोगनिवृत्त्या चरिमोतिविवादिस्थमनिवृत्त्याप्तेः अत एवाधिष्ठानज्ञानन्तामोर्मितितत्र कस्मिन्नप्यविज्ञस्यदर्शपस्य च दर्शनमनापाक्षेनैवोपपद्यतेर
ति तिरस्कं योगंविनाधिष्ठानज्ञानेप्येवासंभवात्पदार्हेत्वरूः स्वसंवेद्यहितत्त्व स्वकुमर्शस्त्यानुसंप्याच्या योगिनैवैज्ञानसंधीहि यथा यदमितियन्नूक्तं भगवत्सूत्र
पादे' वह्लविरः कुत्रापि पाणापेक्षां मनुसारयोवभूद्युत्ति तथा तो ब्रह्मजिज्ञासेत्याथशब्दसूचितमुमुक्षुविशेषणीभूतसाधनचतुष्टयान्तर्गत शमाद्यु
पर्यंसमाधिमहत्त्वोक्तमितिनदोषः द्वैक्रमाविति विशिष्टवाक्यता संपत्तुकरस्य रतिन [illegible] रेपस्य मार्गेहृयोपगमे
नान्यः पंथा इति श्रुतिबाधा पत्याप्रतिपत्तिक्रमभेदमात्रपरतया प्रागेव र्णितमितिदिक् किंच योगमकरणे योगात्प्रपस्मार्गोस्वप्रतिपादनमसंगतं न च तत्र
च कोत्र कश्चिद्विरोधवर्ततेसंभवति वा उक्तपुंक्तरं तो पोवा समदर्शिनइति तापरघ्याहारोयसंगतश्चेतिदिक् ॥१७॥ रामजीराम॥ रामजी॥ रामजी॥ ४४

मा१ नर नपश्यतिसर्वं१

अपात्मैकत्वदर्शनस्यापिफलमाहयोमामितिसर्वत्रासर्वछत्रः भत्सयात्मपरः योयोगीआत्मानंसर्वचात्मनिपश्यति तस्ययोगिनः तातआत्मानमप्रणश्यतिम्मदर्शनेन गछतितातआत्मैनपुनर्मिरोभवतिभक्तत्र्शप्रमूलात्तानस्यवीनाभावेनपुंदस्याप्रंभवारिसर्यः ननुकारणासंघातामिमानिताशुक्तिरूपावद्दृष्टरापघासेनकनदृभि माननात्मापूर्वकंत्तांतस्याधिष्ठानभतेब्रह्ममातिरोधापितुह्रतत्त्वपरूपातितानब्रह्मदृष्ट्यातुमुक्तजीवस्यतिरोपोछेदोभवतीसांशंकाहसर्वभेनमप्रणश्यतीतिसं चविछुर्नेसमभनप्रणश्यतिनतिरोभवतिमदृष्टिचनत्वात्मवेदतेदेवपरिजीवोमत्पिस्थअव्यक्ताबासमविकारिभेवतत्त्वर्निस्वयोछेदंआमुपात्मत्रहमेवत्वम: ततम सेहं ~~[illegible]~~ ब्रह्मामित्रपमात्मानत्ताहेमादिशास्त्रात्तस्माद्युक्तमुक्तमेवमेतनप्रणश्यति यस्मात्सर्वगात्मैकत्वदर्शीस्त्रहमेवनअतो

योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति [illegible] तस्याहंनप्रणश्यामिसचमेनप्र [illegible] णश्यति ३० सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः सर्वथावर्तमानोपिसयो गीमयिवर्त्तते ३१ एवमत्र:४४

नायुक्तोस्मः मतिवधनदस्माहसर्वभूतस्थितेयोपारातनतपासर्वेषुभूतेषुमन्ताह्रस्थितंमांपरमात्मानंएकत्वमात्रब्रह्मणोरेक्यमास्थितः सन भजतितिर्निकत्वेनसमाधिनामेवतेसयोगीव्युत्थानदशायांप्रारब्धकर्मवशात्वाधितानुवृत्तसारेहमारूढः सर्वथासर्वप्रकारेणापहत्वलया दिवत्कर्मत्या गेनवावशिष्टननकादिवद्विहितकर्मणावास्मात्रेयापादिवन्निषिद्धकर्मणानावर्तमानोपिव्यवहरन्नपिमय्येववर्तते मुक्तोभवतिपतोदेवमयोपिनास्यसर्पमिति श्रुपतेतस्मेहनदेवाश्चनाभूत्याईशतआत्माह्येषांसभवतीतिचनेतसामयत्वंदेवात्रपितसयन्नसंविदः अभूतेस्मैनस्वर्याय नईशतेनसमर्थाभवतिपतोयमेषाम मेतिश्रुतेर्थैः सनपुनःसंसारीपूर्ववद्वर्ततीत्यर्थः ३१

गी०
१०८

यद्यपि निषिद्धं कर्म नाचरति आत्मविन्न च अनेन तथापि शीलवानेव योगी श्रेष्ठ इत्याह आत्मौपम्येनेति यथा स्वस्य सुखमिष्टं तद्दुःखं स्वस्यानिष्टमिति सुख्यानिष्टं स्वस्य तेनैव दुःखं न प्रयच्छ
ति अहिंसकः परमो योगी मतः इत्यर्थः ३२ साम्ययोगस्य वा कांस्य चानुपपत्तिं मन्वानो अर्जुन उवाच योयमिति यो यं योगस्त्वया साम्येन मोक्तो हिंसाभावेन
सम्यक् पूर्वं कतया वर्णितः हे मधुसूदन तस्य योगस्याहं वृत्तिनिरोधरूपस्य स्थितिं न पश्यामि मनसश्चंचलत्वादिति शेषः ३३ एतदेवोपपादयति चंचलं हीति
प्रमाथि बहु दृढमुवेदस्यस्य मर्यादात्तं ३४ मनसो दुर्निग्रहत्वमभ्युपेत्य श्रीभगवानुवाच यद्यप्येवं तथापि अभ्यासवैराग्याभ्यां सुनिग्रहमपि मनो निगृह्यते तत्र

आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः ३२ अर्जुन उवाच योयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्र
हं मन्ये वायोरिव सुदुष्करं ३४ श्रीभगवानुवाच असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वैराग्येण च गृह्य
ते ३५ असंयतात्मना योगो दुष्प्राप इति मे मतिः वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ३६॥ रामजी रामजी ४४॥

अभ्यासो नाम चित्तस्य चित्तशुद्धौ समानप्रत्ययावृत्तिः वैराग्यं तु दृष्टादृष्टेषु भोगेषु समाधनेषु दोषदर्शनेन वैतृष्ण्यं तत्र यथा केदारिकः केदारेषु
कुल्यां ... संचारयन् एकस्यां द्वारं पिधाय परस्यां द्वारमुद्घाटयति तद्वत् वैराग्येण विषयस्रोतः खिलीक्रियते अभ्यासेन कल्याणस्रोत उद्घाट्यते इति योग
दपि आवश्यकत्वं तत्र चाह सूत्रं अभ्यासवैराग्याभ्यां तन्निरोध इति ३५ असंयतात्मना अजितचित्तेन वश्यात्मना जितचित्तेन उपायतः अभ्यासवैराग्य

राम०
१०८

कृष्णं २

मनसोऽपीतियत्नंहत्वायोगसिद्धोविभ्रंशपतनंअर्जुनउवाचहेकृष्णयोगात्कर्मयोगाच्चलितमानससन्कर्मोस्माभिसमर्थः अश्रद्धयाउपेतोयोगमार्गं
प्रविष्टोपिअयतिः आयुषोऽल्पत्वात्दैवेनवाअल्पप्रयत्नः अलब्धयोगपरिपाकत्वात्कर्मसकलादितस्ययोगसंसिद्धिंयोगफलंसम्
यग्ज्ञानमप्राप्यमत्स्येतकांगतिंगच्छति ३७ कच्चिदितिकच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्चविभ्रष्टः छिन्नाभ्रमिवैमपवर्गंवामेघसंघमप्राप्यम
ध्यएवनश्यतितद्वत् अप्रतिष्ठोनिराश्रयः हेमहाबाहोविमूढोब्रह्मणःपथिब्रह्मप्राप्तिमार्गे ३८ एतत्संशयंमेममत्वंछेत्तुंभगवानुवाचपा

अर्जुनउवाच अयतिः श्रद्धयोपेतोयोगाच्चलितमानसः अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति ३७ कच्चिन्नोभय
विभ्रष्टःछिन्नाभ्रमिवनश्यति अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथिः ३८ एतन्मेसंशयंकृष्णछेत्तुमर्हस्यशेषतः
त्वदन्यःसंशयस्यास्यछेत्ता [illegible] नह्युपपद्यते ३९ श्रीभगवानुवाच पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते नहि
कल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ४० प्राप्यपुण्यकृतांलोकानुषित्वाशाश्वतीः समाः शुचीनांश्रीमतांगेहेयोग
भ्रष्टोभिजायते ४१ रामजी ४४ ॥

र्थेतिहतातेतिगस्तत्वात्संबोधयतितस्यइहविनाशोनीचयोनिप्राप्तिः अमुत्रविनाशोनरकप्राप्तिस्तदुभयमपिनास्तीत्याहनहियतः कल्याणकृत्शु
भकृत्दुर्गतिंनैवप्राप्नोति ४० इहामुत्रचतस्यमहत्त्वमेवालीसाहप्राप्येतिउषित्वावासंकृत्वाशाश्वतीः समाः निरावासवत्सरान्योगभ्रष्टोयोगे
देतस्मात्अल्पकालाभ्यस्तयोगश्चश्रीमतांगेहेजायतेतत्रापिश्रीमदवतीसारांकस्यशुचीनामित्युक्तेशुचयोहिसत्कार्येषुश्रेयस्प्रयुञ्जानाः पृथीर

भी०
१०५

मयोगी चिरकालाभ्यस्तयोगस्तस्य गतिमाह अथवेति ४२ तत्रेति द्विविधेपि जन्मनि पौर्वदेहिकं पूर्वदेहभवं बुद्धिसंयोगं यावती योगभूमिः पू र्वजन्मनि जिता तत्रैव पर्यवसन्नबुद्धिर्लभते जाता तस्या एव तं बुद्धिसंयोगं पूर्वाभ्यासात् लभते तेनैवाभ्यासेन लभते ततः तस्मादपि भूयस्तां व त्यां संसिद्धौ तु उर्ध्वभूमि लाभार्थमित्यर्थः यततेयत्नं करोति ४३ कुतोपततेत्याशंक्य तत्राह पूर्वेति अवशोपि कुतश्चिदन्तरायादिभिरस्वाधीनोपि मानोपि तेनैव पूर्वाभ्यासेन बलवता ह्रियते योगः अवशाः क्रियते यतः योगस्य जिज्ञासुः ज्ञानमात्रमिच्छन्नपि भवति सोपि शब्दब्रह्म वेदोक्तकर्मकाण्डं हरमपि अति क्रा मति वर्तते किं पुनः पित्राघातं रूढेतेः पूर्वाभ्यासबलेन यत्नमहत्तमपि पर्व्याप्रियत्नं हठ्याकरोतीत्यर्थः ४४ एवं योगभ्रष्टस्य सिद्धप्राप्तिविषये इन्द्रियमारागीप

पि

अथवा योगिनामेव कुले भवति धीमतां एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ४२ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ कुरुनन्दन ४३ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः जिज्ञासुरपि योगस्य शब्दब्रह्मा तिवर्तते ४४ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गति ४५ रामजोयम

प्रयत्नेन योगमेवाभ्यसितुं प्रवर्तते तस्य गतिमाह प्रयत्नादिति [illegible] प्रयत्नात् उत्कृष्टात् हठाद्यतमानस्तु पुनिरोधारि इत्यात्परो च पारिशु द्धविशेषाभ्यासात्पोपत्रमानः संशुद्धकल्मिषैर्यानिः पापो भवति परा हमतः प्राणापानेषु देहे नरः तिरङ्गयोगानां सर्वेषां पापनिवृत्तये योगितं ननतस्माभ्यात्कारेस्मा आत्मसाधनत्वमित्यर्थः अतएव सः अनेकैः जन्मभिः संसिद्धः प्राप्तयोगो भूत्वा ततः परां गतिं मोक्षं याति एतेन च स्पृष्टे यांते श्रेयं वारित्यि पञ्चमांते पत्स्त्वितेन व्याख्यातं ४५

राम०
१०५

त ३ गा ३

एवं योगिनं स्तौति तपस्विभ्य इति तपस्विनो कृच्छ्रचान्द्रायणाद्युपवासादिकर्तारः ज्ञानिनश्च शास्त्रीयपाण्डित्यवन्तः कर्मिणोऽग्निहोत्राद्यनुष्ठातारः तेभ्यः सर्वेभ्यो योगी अधिकः तस्माद्योगी भवार्जुन ४६ समाप्तः कर्मप्रधानस्त्वंपदार्थविवेकः अथ परं उपासनाप्राधान्येन तत्पदार्थं निरूपयितुकामस्तदुपासनां महाफलत्वेन स्तौति योगिनामपीति द्वे एवमवापरेषु प्रथमसाधनं पञ्चमाध्यायप्रोक्ताः द्वादश योगास्तदुक्तं तेषां योगिनां सर्वेषां मध्ये यो मद्भक्तः मयि वासुदेवे समर्पितेनान्तरात्मना चित्तेन श्रद्धावान्सन् मां भजते स मे मम युक्ततमः अतिशयेन युक्तः अभिमतः तस्मान्मद्

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठो

क्तो भवेति भावः ४७ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे श्रीभीष्मपर्वणि भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे षष्ठोऽध्यायः ध्यानयोगार्थप्रकाशः त्वंपदार्थविवेकश्च समाप्तिमगमत् ॥ रामजी ः ४४ ॥ ः॥ ः

अध्या० १ श्रीरामजीरामजीः ४४ ः॥ ४४॥ रामजीराम ः ४४

पूर्वाध्यायांते यो मां भजते स मे युक्ततमो मत इत्युक्तं तत्र कीदृशं पूर्वोक्तविशिष्टमे योगापेक्षया विलक्षणं त्वद्भजनं केन वा गुणेनापूर्वं तस्येक्षया तस्य
युक्ततमत्वमित्येतामर्जुनस्याशंकां स्वयमेवपरिहरिष्यन् श्रीभगवानुवाच मय्यीति कश्चिद्राज्ञाश्रयो धनमानासक्तमनो भवति त्वं यं तु मदाश्रयणमात्म
वपरमपुरुषार्थमनंतं प्राप्तुमिच्छमदस्यार्थः इह शोयोगं युंजन्समाधिमनुतिष्ठन् स्वंपरार्थं विवेककालेयद्यपि मार्गे सर्वभूतस्थमात्मानमिसारिवत्र
नात्तथापि स्वस्मादन्य ईश्वरोऽस्तिनैवेति पातंजलिकापिलयोर्विवादस्तत्किंकमीमांसकयोर्वादिभ्यां निरीश्वरयोर्मतभेदात्संशयः । कारणात्मनाश्च
समग्रं तत्सर्वं ज्ञास्यसीति मत्वाह असंशयं समग्रमितिमां तत्स्वरूपं यथा ज्ञास्यसि तत्तेमकारं श्रृणु अत्र वक्ष्यमाणरीत्या समग्रं वासुदेवात्मकमिति

सू १   टी २

श्रीभगवानुवाच मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु १ ज्ञानं तेऽहं स
विज्ञानमिदं वक्ष्याम्यशेषतः यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते २ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये य
ततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ३

भजनैकेन शरणं कारणज्ञात्वत्त्व मम योगिनः पूर्वयोगापेक्षया शिघ्रगम्यतीति भावः १ तदेवाह ज्ञानमिति ज्ञानं सुदृढं तत्त्वं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्म
विज्ञानमानंदं ब्रह्मेति श्रुतिं तु भ्रमस्त्वं वक्ष्याम्यशेषतः साधनकलापसहितं तल्लमरामसत्त्वमीमांसादीशशास्त्रपरोक्षज्ञानेन शब्दस्य स्वविषयापरोक्ष
ज्ञानजनकत्वनियमादिंशका हस्वविज्ञानेऽनुभवोतिसहितं स्वशमसत्त्वमीमांसादीशशास्त्रपरोक्षज्ञानो सन्निदर्शनात्केम्मिन्नु भगवो विज्ञाते सर्वमिदं
विज्ञातमितिएकविज्ञानात्सर्वविज्ञानमतितांयुतिमेवदर्शयति यत् ज्ञात्वेतिजगत्कारणाधिष्ठानस्य ज्ञानस्वरूपस्य ब्रह्मणो ज्ञानेन संशयो छेदात्सर्वस्यात्मा

मा २   त्वेवज्ञातव्यानवशेषायुक्तरस्यार्थः एतदेवज्ञानेदेवं समग्रं दुःखेनलभ्योतिमनुष्याणामितिपततांप्रतमानानां ३

जा१

एवमेकविज्ञानात्सर्वविज्ञानंप्रतिज्ञायतदुपपादनाय : सर्वस्य तत्त्वं प्रपंचस्य ज्ञानात्मकप्रपंचमवलमाह त्रिभिः भूमिरिति अत्र भूम्यादिपदैस्तत्कारणान्येवा-
च्यंते प्रकृतिविषयिकाणां तस्य स्थूलभूम्यादेरग्रे विकृतिमात्रत्वात् तथा च भूमिरिति गंधतन्मात्रं आप इति रसतन्मात्रं अनल इति रूपतन्मात्रं वायुरिति स्पर्शतन्मा-
त्रं खमिति शब्दतन्मात्रं मन इति तत्कारणमहंकारः बुद्धिरिति महत्तत्त्वं बुद्धिर्महत्तत्त्वं अहंकार इत्यनेन सहंकारो मूलप्रकृतिः करणोऽव्यक्तं सर्वगसा
बाहुल्यात् ... अष्टधा पंचमेमतः अभिन्नाष्टधा यं शक्तिर्युक्तिशक्त्यादिवरजतं अष्टधा अष्टप्रकारा प्रकृतिः जडप्रपंचोपादानभूता मद्धि नायाव्यक्तम

> भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ४ ॥ भगवानुवाच॥
>
> अपरेयमितस्त्वन्यां प्रकृतिं मे परां (विद्धि) जीवभूतां महाबाहो ययेदं धार्यते जगत् ५ ॥ भगवानुवाच ॥

अहंकारपंचतन्मात्राणि अष्टौ सांख्याभिमता एव प्रकृतयो व्याख्याता इतीयं मोऽस्तिमनसा ध्येयपुरुष्यति भगवान् अहंगोतीति मनःस इंद्रियाणां प्रकृतिरव्य-
क्तोऽनन्तापि प्रकृतयः तथाचैवं पाठः अयं मे भिन्ना प्रकृतिः आकृताख्या भूम्यादिभिरेनाष्टधा प्रतिमूलप्रकृतेः अभूम्यादिभिः महत्पारागतो मतम
वराभ्यतेन संख्यानाभिवाक्त्वमत्वं तस्मात् व्यक्तमुक्तं द्विगुणां द्विजसत्त्वमिति अव्यक्तंपुरुषेण अनिक्लेसंमलोपत इति वर्तस्मात् अपि भगवमलपयोः ४०
वैक्केयाक्तिकां प्रकृतिमुक्त्वा ऐश्वर्यतां तिमिकांतामाह अपरेयमिति इयं माया उक्ता सा अपरा अर्था सृष्टा अजस्त्वात् इतस्तु विलक्षणामन्यां परां चेतनतेनमन्यत्वात् उ
त्कृष्टां मम स्वं बंधिनीं प्रकृतिं जीवभूतां माराणाध्यारणानि भिन्नभूतां क्षेत्रज्ञाख्यां विद्धि जानीहि हे महाबाहो यया प्रकृत्या अंतःप्रविश्य परं जगत् स्थावरजंगम
शरीरात्मकं धार्यते ४

पंते१

गी०
१११

इ॰ १

एतदिति एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती यो निः अखिलस्य एतानि येषां भूतानां तानि एतद्योनीनि बहुविधानि सर्वाणि उपधारय सम्यग्जानीहि किं चैतेन ल भिव प
ते प्रकृती मदीये अतो द्वाराद्वारेण सर्वकार्यं करोति अहमिति कृत्स्नस्य सर्वस्य प्रकृतिसहितस्य जगतो जगद्रूपस्य भगवतः प्रभवत्यस्मादिति प्रभवः उत्पत्तिकारणं तथा प्रलीयतेऽस्मिन्निति प्र
लयः लयस्थानं च अत एव तस्ते अमे अपि प्रकृती मत्तो नातिरिच्येते ६ एवमेकविज्ञानात् सर्वविज्ञानं प्रकृतं आत्मनो जगदुपादानत्वेनोपपाद्य ९ आत्मनो निर्विकारत्वेनाह मत्त

एतद्योनीनि भूतानि सर्वाणीत्युपधारय अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ६ मत्तः परतरं नान्यत्
किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ७ राम जी राम जी ॥ ४४ ॥ ४४ राम जी ॥

नाहं मत्त इति कारणान्तरादेः परं पटस्य कपूतं घटादिस्तु यद्वा हारे तयोर्भेदानुभवात् परतरं तु गवाद्यादिषु सूत्रे पुदानकत्वात एवं ब्रह्मणः परतरं तस्योपादानं कि
किंचिदपि नास्ति हे धनंजय यस्मात् प्रपंचे ब्रह्मा व्यतिरेकं भरत्येव ब्रह्माणं प्रपंचव्यतिरेकमदृष्टान्तमाह मयीति मयि सूत्रे यथा सूत्रगणाः तथैव गावस्तत्रैव तत्सर्वं तत्र अनुस्यूतेय
दिदं सर्वं मणिगणा इव सर्वस्य सर्वस्याहं कर्तान्तर्योगेन तेन न्यायात् हेम्नो नु हत्तिमित्यमिति न्यायेन प्रपंचाती तोऽहं मत्तो न सम अविकारित्वमित्यर्थः ७ राम जी राम जी राम जी
श्री राम जी राम जी ॥ ४४

राम०
१११

ता २

मत्तोन्यत्परमात्मनो मे रोगिरस्त्यपृथग्भूतं नान्यत्किंचिदस्ति मत्तः परतरं नान्यत्किंचिदस्ति जगत्कारणं ... यथा सूत्रे मणिगणा इव ...

गतत्वं तत्तथापि ... मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ...

एकमप्यपरमाणुमपरिसमाप्तं ... प्रोताः एवं प्रमार्थं ... प्रोताः प्रणवः सर्ववेदेषु प्रोताः तद्यथा शंकुना सर्वाणि

पर्णानि ... तस्मात् ... प्रकाशे शब्दः सारभूतत्वादस्मि

न्न पि ... पुरुषसारं ... तत्र पुरुषाः प्रोताः एवमेवापि सर्वं ... पुण्यः ... पृथिव्यां

रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८ पुण्यो गंधः पृथिव्यां च तेज

श्चास्मि विभावसौ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ९ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं बुद्धिर्बुद्धिमतामस्मि

तेजस्तेजस्विनामहं १० बलं बलवतां चाहं कामरागविवर्जितं धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ११ रामजीरामः

ता १

... पुण्यः सर्वस्माद् ... विलसितं ... तेजः ... शक्तिः जीवनं ... जीवन ... तत्र ... सर्वाणि भूतानि ...

... तपस्विनः प्रोताः ९ बीजं कारणं सर्वभूतानां ... बीजमपि ...

... सनातनं ... बुद्धिरूपेणापि बुद्धिमंतः प्रोताः तेजः प्रागल्भ्यं तद्रूपेणापि प्रागल्भाः प्रोताः १०

बलरूपेणापि बलवंतः प्रोताः कामरागविवर्जितं ... धर्माविरुद्धः काम ...

... कामवंतः प्रोताः ११

भी०
११२

तो३

सात्विका धर्मज्ञानवैराग्यैश्वर्यादयः राजसाः लोभदर्पादयः तामसाः निद्रालस्यादयः तान्सर्वान्मत्त एव मत्तन्मात्रादि स्वस्वरूपात्मनो निर्गताइति विद्धि न
त्वहं तत्र सर्वजगदात्मनो विकारित्वाभावात्कोटस्थ्यहानिरित्याशंक्याह न त्वहं तेषु ते मयीति यथा वाय्वादयः पूतास्तेषु स्थावरवभूतेषु स्फारि रिव न तन्न रूपेषु
अबाधितात्म चिन्मात्ररूपो घटस्य रज्जुरिव नाहं विभ्रम नास्मि अत्र तस्मात्त्वत्तः स्फुरणेऽपि स्वकीय पश्यन्नाभिमानतः मत्तानामभवामीत्यर्थः ते तु मय्येवा
ध्यस्तामत्तनया ये पश्यन्नाम ध्यस्ताः सर्पादयो रज्ज्वन्यास्तेऽनन्यत्वमारंभणशब्दादिभ्यः इति न्यायात्तदनन्यत्वं व्यतिरेकेणाभावः न खलु तदनन्यत्वमिति सूक्ष्मे
रंभृमः किंतु मेरं वा र सामः कुतः आरंभणशब्दात् वाचारंभणं विकारो नामधेयमिति विकारस्य वागालंबनत्वेन स्वप्नमायेन्द्रजालिकविषयसाम्यश्रु

श्रीभग ये चैव सात्त्विका भावा राजसास्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि १२ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जग
त् मोहितं नाभिजानाति मामेभ्यः परमव्ययं १३ एतेभ्य एतेभ्यः एतेभ्यः मत्तो भिन्नाजानाति मां ॥ एवमत्तः

तेः न हि आत्मनो विचित्रप्रपंचात्मत्वे तेन मया स्वशक्तिरोधि पिनत्वहं तेषु ते शविरोधो विरोधो युज्यते कार्यस्य कारणात्मकत्वावश्यंभावात् तस्मादि वेदे
वा राज्ञ्ये रोगवत्सम्यग्जगदुपादानत्वकृत् ते निर्विहृत इति साधुक्तं न त्वहं तेषु ते मयीति १२ कथं तर्हि स्थूलसूक्ष्मप्रपंचबाधेन जनाः आत्मानं नाग
च्छंतीत्याशंक्याह त्रिभिरिति एभिः पूर्वोक्तैस्त्रिभिस्त्रिविधैः भावैः पदार्थैः इति नियमादि गुणमयैः सत्त्वरजस्तमोगुणविकारैः इदं चराचरं प्राणिजातं जग
त् ध्वस्तं मोहितं सत्त्वगुणमयैः परमात्मनः परत्वं सर्वधर्मेणाकुलः सर्पः संसारे तत्त्वज्ञानाभावेन हेतुः अत्र यदेते भावाः परि
णामित्वात् व्ययवंतः अहं तु तद्विपरीतः सा सीरसन्ययः १३

मांचं२ रा३

राम०
११२

नै १

ईश्वरस्य बीजस्येव लीलया क्रीडतो मम संबन्धिनी यं दैवी हि [illegible] मिथ्यापि दुरत्यया दुःखेन तरणीया रूपेणाविर्भूता एषा मम चिन्मात्रस्य माया महं तत्त्वज्ञानाश्रिता सा हि ब्रह्मस्वरूपे
नापलापात् अहं ब्रह्म पञ्चेन्द्रियं ज्ञानात् रविब्रह्मकाशिका गुणमयी सत्त्वरजस्तमोगुणमयी दुरत्यया दुःखेन तरणीयापि मामेव ये प्रपद्यन्ते भूतपूर्वं प्रागवर्तन्त ते सर्वे एव पञ्च
ते विषयाकुर्वन्ति एवैतां मायां तरन्ति अधिष्ठानज्ञानेन मूलस्य भ्रमस्य बाधो भवति न तु ज्ञानान्तरेणावाहनिवृत्तिर्निरोध एवेत्यर्थः अयमर्थः जीवस्वरूपवि
भागशून्यशुद्धचिन्मात्रकल्पिता मायाऽऽवरणः चित्प्रतिबिम्बरूपेण जीवेशौ कल्पितावेव तस्मान्न तु मुक्तौ प्रचलति अयस्कान्तमनुरूप्यैव लोहशलाकादरमेव
ईश्वराधीनत्वं मायाज्ञानेन हागमद्वारा सूक्ष्ममपि तथा च श्रुतिः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध इति तथा चैकैव माया जीवेश्व

मा० १२

दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते १४

रयो रूपाधिरूपेणावस्थितयोः बिम्बप्रतिबिम्बभावनाक्रान्तमुभयानुस्यूतं शुद्धचिन्मात्रमनन्तं ततस्तीयं मुक्तमायाजीवेश्वरोपाधिरूपे सा यातत्त्वा
यां अल्पत्वं तत्वं तत्वंशामित्रतादि भावं भजते तत्तदेव तद्भावे उपाधिप्रचारदर्शिनो उदासीनो धर्मरूपतया जीवस्य स्वेश्वरस्य स्वोति शब्दाभ्यां अर्थे पि
तेष्वेवं च जीवः ईश्वराराधनाद्वा पमस्य तत्त्वज्ञानेन मायाया न श्यति तत्कार्यस्यापि नाशेन सा स्यादा मा वास्तु लिलमपि परिसर्गवि वप्रतिबिंवानुस्यूतं
शुद्धं तत्तीयं बुद्ध्यैतत्त्वं मां प्राप्नोतीति तदिदमुक्तं दैवी मायेति चैकस्याः एव जीवेश्वरसंबंधित्वे जीवेश्वरभजनेन मायोत्तरणमिति च १४ १४ ४६

सास्वत ३

गी०
९२

कुत्सितं हिंसैर्वं त्वां प्रपद्यमानं नरं तीसा शंक्याह न मामिति यतो दुष्कृतिनः अमर्षिताः शुभा सावामृताः आत्मानात्मविवेकहीनाः अत एव नराधमाः
मां न प्रपद्यन्ते कुतो दुष्कृतिनः यतो माययापहृतज्ञानाः अपहृतं ज्ञानं आत्मं संविद्रूपं अस्य एषां ते अपहृतज्ञानाः एतेन माययावरणशक्तिरुक्ता
किंचं आसुरं आसुरा राग्विरोधनाधीनां भावंचिंता अभिप्रायं आत्मेव देहमहं त्वपरस्मादिनाश्च तं देहेन्द्रियसंघातएवसमपकत्वमेशगियरः सेवंविधं आश्रिताः एते
न माययाविक्षेपशक्तिरुक्ता तदेवं माययापहृतज्ञानं रं आवृतस्वरूपात्मभ्रमेण जनितमतिरभिमाना देहादिषु स्वर्थे दुष्कृतं कुर्वन्तीति न मूढाः सन्तो नराध
मा मां न प्रपद्यन्ते सर्वानर्थमूलं मायेवेत्यर्थः १५ ये तु मत्स्यपि रहायं ध्यासेमन्तोविमतिमन्तो सर्वं सुकृतमेवाचरंतीति तेपि चतुर्विधाः नकेवलं मर्दे वमेदेक
का मां स्मा शंपनाह चतुर्विधा इति आर्त्तः पीडितः पीडापरिहारार्थी जिज्ञासुः साक्षात्त्वनाशार्थी धनाद्यर्थी ज्ञानी चेति चतुर्विधा मां भजन्ते १६ किंस्वेषां

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः माययापहृतज्ञाना आसुरं भावमाश्रिताः १५ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन आ
र्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः १७

समा एते सुकृतिनः किंन्धारयोपेन विशेषरागाद्स्त आह तेषामिति तेषां मध्ये ज्ञानी विशिष्यते यतो नित्ययुक्तं आत्तरयोहिका मिनः कामहतेनम
इं नैव युक्ता भवन्ति अयं पुनः नित्ययुक्त एकभक्तिश्च एकं भावेन भजनं करोतीति तथाहि स्मार्तो गिरा सर्वं भजन्ते त्रिमाम्यः सरस्वतीमर्थार्थिकः कुवेरं तीम
तेषां तत्त्वकर्मार्थितेनानेकभक्तित्वं हृश्यते तस्मान्नित्ययुक्तत्वेएकभक्तित्वं हेतुः हि यतः ज्ञानिनोऽहं अत्यर्थं प्रियः आत्मत्वादेव आत्मा च प्रियः निरु
पाधिप्रेमगोचरत्वात् लोके तत्सेयः पुत्रात्मेयो वित्तात्मेयोऽन्यस्मात्सर्वस्मादंतरं यदात्मेति श्रुतेः स च ज्ञानी मम प्रियः भक्तानां दुर्लभत्वादिति भावः १७

एम०
९२

उदाराइतिसर्वेप्येते उदाराः उत्कृष्टाएवज्ञानीत्वात्मैवेतिममतंनिश्चितोऽसावास्थितः प्रयुक्तात्माऽहमेवभगवान्वासुदेवइत्येवंमयिसमाहि-
तचित्तः मामेव अनुत्तमांश्रेष्ठांगतिमास्थितः नतुमत्तोऽन्यत्आरोग्यादिकंकामयमानोमद्भक्तिंकरोति किंतुमत्प्राप्त्यर्थमेवमांभजतइत्यर्थः १८
किंचवासुदेवः सर्वमितिज्ञानवान्योबहूनांजन्मनामंते चरमजन्मनि मांप्रपद्यते सम्यग्दर्शनेनापरोक्षीकरोति समहात्माअत्यंतसुदुर्लभः
तिप्राज्ञना १९ अन्येतुतैस्तैः कामैः पुत्रपश्वादिविषयैर्हृतज्ञानाः हृतंहरीकृतंज्ञानंविवेकोयेषांते अन्यदेवताअहमेवतत्साक्षादाराधनैरफलमवा
प्स्यामीतिभेदबुद्ध्याप्रपद्यंते इंद्रादीन्भजंते तंतंनियमंचतुर्दश्युपवासादिकंआस्थायस्वयाप्रकृत्यासावस्त्रमाराविधयादैवाख्यासुयोवानियताः २०

उदाराः सर्वएवैते ज्ञानीत्वात्मैवमेमतं आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं १८ बहूनांजन्मनामंते ज्ञानवान्
मांप्रपद्यते वासुदेवः सर्वमितिसमहात्मासुदुर्लभः १९ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेन्यदेवताः तंतंनियममास्थायप्रकृत्यानिय
ताःस्वया २० योयोयांयांतनुंभक्तः श्रद्धयार्चितुमिच्छति तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं २१ सतयाश्रद्धयायुक्तस्तस्याराध
नमीहते लभतेचततःकामान्मयैवविहितान्हितान् २२ रामजीहनुमानजीरामजीरामः ४४ रामजीरामरागुणोतमए

किंचयेयेभक्ताः एतत्सामान्यतःकाम्यामनायायांतनुंतांदृशीमेवादिरूपांयस्तुरुद्रकोरूपांभूतप्रेतरूपांवामूर्तिंश्रद्धयाऽर्चितुमिच्छति तस्यभक्तस्यता
मेवश्रद्धांसात्विकींराजसींतामसींवाहंसर्वेश्वरोऽचलांविदधामि २१ ततस्तयैवश्रद्धयायुक्तःसन्तस्याः मूर्तेः आराधनंसंसाधनंशीघ्रमीहते कामी
हूतेइच्छतिततस्तःकामान्विषयान्लभतेमयैवविहितान्स्रष्टापितान्हितान्ईश्वितान्एतेनसर्वासांदेवतानांसाक्षात्तावरावर्त्तित्वंदर्शितं २२

ने२

अल्पेस्मयत्रौपेमस्मैस्तंमन्नेनुर्तमहिन्नानातितरल्पमितिमुतेः हूतंअल्पसंतेत्रेभेमधायेषांतेवात्यार्थाभिलाषिणाइत्यर्थः तेषांतत्फलंअंतवतस्वंस
वात्यार्थस्यांतव तारेवांतशहोः भेदेनेश्वरभक्तेभ्योविभेदार्थः यतोदेवयजोदेवाम् जेतेइतिदेवयजः तेषांमन्नंतयुक्तानेवयांतिमेर्वेयच्छरक्षोभक्ताः
यत्क्लादिनि चयांति भूतेपतभ [illegible] क्ताश्चभक्ताद्विविधस्यपिकृष्णसंमद्भक्ता
स्तुमामेवानंतंयांति अनंतः नंतफलभाजइत्यर्थः २३ एवंतर्हिकृतस्तामेवसेवेनप्रतिपद्यंतइत्याशंक्याज्ञानादित्याह अव्यक्तमिति अव्यक्तंसर्वोपाधिभि
मनाश्रमसूरभक्तिवासुदेवशरीरेणाव्यक्तिमापन्नंअस्मदादिवच्छरीराभिमानिनंमामवुद्धयोमन्यंतेयतः ममपरंभावंपरस्वरूपं अजानंतः उत्कृष्टम

अंतवत्तुफलंतेषांतद्भवत्यल्पमेधसां देवान्देवयजोयांतिमद्भक्तायांतिमामपि २३ अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः परंभा
वमजानंतोममाव्ययमनुत्तमं २४ नाहंप्रकाशः सर्वस्ययोगमायासमावृतः मूढोयंनाभिजानातिलोकोमामजमव्ययं २५ वेदाहंसमती
तानिवर्तमानानिचार्जुन भविष्याणिचभूतानिमांतुवेदनकश्चन२६

ववििशष्टं नष्टिमव्ययंनच्छेनोसर्वज्ञंअविनाशि अनुत्तमंयस्मात्तस्मात् उत्कृष्टंचनास्तिनिरतिशयमनंतैश्वर्यरूपमित्यर्थः २४ कुतस्त्वद्विषयमज्ञा
नंलोकस्येत्यत आह नाहमिति ह्योगयोगिनश्च शी आयावस्तंपांतोपयोगमाद्वः अहंतस्यतार्थः सर्वस्ययोगिनस्त्वंपरार्थमात्राभिज्ञस्यनमका
शोस्मि अत्रहेतुः मायासमावृतइति मायेतुयोगोयुक्तिः गुणानांघटनंसैवयोगमायाविज्ञस्यमाधिर्योगोभगवतस्तत्कृतामायेतिभवगत्संकल्पवश
वर्तिनीमायेत्यर्थः अतएव स्पष्टार्थः २५ ननुतर्हिअलौकिंतन्मायामोहयति त्वांकुतोनमोहयतीत्यतआह वेदाहमिति समस्तमपिलौकिक्सममम
चभेदपिश्रोपाधिकभेदस्यसत्वात् उपाधिधर्माभिमानित्वाल्लोकोमूढः तत्रभाववाच्यांदस्यवेदितेतिविशेषः अक्षरार्थः स्पष्टः २६ ४२ ॥

केनप्रकारेण निमित्तेन अतीतानागतानि भूतानि न जानन्ति तत्राह इच्छेति इच्छा रागः द्वेषः तयोः समुत्थितो द्वंद्वमोहः शोभनाशोभनयोः सामान्यतिमा [illegible] निसात्मानात्म सुविपर्ययः अशोभने शोभनबुद्धिः शोभने वा अशोभनबुद्धिरित्येवं रूपस्य हेतुभूतेन सर्वभूतानि संमोहं सर्गे विवेकाभावं यांति हे परंतप अयं भावः यो हि सर्वदा इष्टं रूपं चक्षुषा प्रत्यक्षं घटपटादि तस्य केनचित्प्रकारेण ज्ञानं भवति अयं शोभनो अयमशोभनः शोभनाध्यात्म अमनोज्ञे अयं शोभनः [illegible] निवृत्तिं आत्मा तस्य नात्मनि द्वारात्मा अध्यात्मतत्त्वमतो विपर्ययेण न तेषां ज्ञानं भवति इत्यर्थः न च तं संज्ञायतेऽस्मादिना इति २७ केषां तर्हि मा वेदं भवतीत्याशंक्याह येषांतिति द्वाभ्यां

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यांति परंतप २७ येषां त्वंतगतं पापं जनानां पुण्यकर्मणां ते द्वंद्वमोह निर्मुक्ता भजंते मां दृढव्रताः २८ जरामरणमोक्षाय मामाश्रित्य यतंति ये ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं २९ रामगीताः

येषां पुनः जनानां पुण्यकर्मणां पापं अंतं गतं अतएव शमादिसाधनसंपन्ना इति समासः ते द्वंद्वमोहेन मृत्युलक्षणेन निर्मुक्ताः सतः प्रथमं दृढव्रताः शमदृढव्रताः शमदमादिसाधनभाजः भूतानां भजंते २८ तान्याह जरामरणयोः प्रवाहात्स्यात्मनो मोक्षाय ममाश्रित्यमपि समाहितं साभ्यासाय यतंति ज्ञानलाभाय वैराग्यवरणादिना ते तत्सर्वं वेदांतमपि इदं कृत्स्नं ब्रह्मविदुः [illegible] विराग्यगुणसंकल्पकृत्स्न ब्रह्मविदः सर्वकारणं यो निष्कलः स्वप्रकाशज्ञानात्माधिगोपालकालो पासकास्तुतस्य कृत्स्नत्वं ब्रह्म अधिविदेशं तेऽस्य अध्यात्मिकां कांतं मन्ति ज्ञानं तीतिमवेदिशोभनं तीत्यर्थः अनेन यतमानत्यानेह भूयो मतत्यानत्व मविंद्यते इत्येकविंशत्यात्स्मविवेकानभवति तथा पूर्वं कृता तस्मात्पवर्गसंहारो इत्यर्थः अध्यात्मं आत्मनिविधा शरीरस्थितं ज्ञानमात्मविषयं वेत्ति शुद्धं तं परार्थमित्यर्थः कर्म च तत्तत्परायणता नयोः साधनं अखण्डानादिकं सर्वं विदुः ३० ॥ ४१ ॥१६॥

एवं तत्पदार्थविवेकं सद्योमुक्तिहेतुमभिधाय तत्प्राप्त्युपायभूतमुपासनादिकं क्रममुक्तिफलं निर्विशेषेणावक्तुकामः संक्षेपेणाह साधिभूतेति अधिभूतेन अधिदैवेन च सहितं साधिभूताधिदैवं मां अधियज्ञेन सहितं साधियज्ञं च मां ये विदुः ते युक्तचेतसः एतैर्निरूपणमाहितचित्ताः सन्तो मां प्रयाणकालेपि सर्वजनमोहकेपि विदुः ते मां ध्यात्वा प्रयाणकालेपि तस्मात्तस्मादयमेव योगो भवतु तावद्भगवति नैरंतर्येण दृढभावनाकर्तव्येति भाव अधिभूतादिपदार्थं तु भगवानेवाख्यास्यतीति नात्र कथ्यते ३० इति नैलकण्ठीये भारतभावदीपे भीष्मपर्वणि गीतासु सप्तमोऽध्यायः पूर्वस्मिन्नध्या

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेपि च मां ते विदुर्युक्तचेतसः ३० इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः अर्जुन उवाच किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते १ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः २:८:

ये मायोपहितं ब्रह्म जगत्कारणमुक्तं तच्च उत्तमानामनुपयोगि ब्रह्मप्रतिपत्तेरुपलक्षणं मध्यमानामुपास्यं चेति मत्वा प्रतिपत्तव्यं ब्रह्म तद्विषय एक उपासनाविषयश्चापर एवं समग्रमस्मिन्विषये स्वतो ब्रह्म तद् द्विरूपं ध्यायां ते साधियज्ञेन भगवता सूत्रितमत्र द्विरूपमध्याय स्यारभ्यते तत्र सूत्रितानां ब्रह्मादिशब्दानामर्थं बुभुत्सुरर्जुन उवाच किमिति किं तद्ब्रह्मेति प्रथमः प्रश्नः शेषः स्पष्टार्थः प्रश्नोकार्थः १ अधियज्ञः कोऽत्र क इति स्वरूपप्रश्नः कथं ज्ञेय इति यत्नाकर्षेणात्त उपासनाप्रकारप्रश्नश्चेति द्वयं मिलित्वा एक एव प्रश्नः शेषं स्पष्टं २ रामजीः

रामजीरामजीरामजीः॥ ४४:॥६

क्रमेणैषां प्रश्नानामुत्तरमाह अक्षरमित्यादिभिः नच किंतद्ब्रह्मेत्यस्योत्तरं परमं ब्रह्मेति परमं अक्षरं तद्ब्रह्मेति योजना अक्षरशब्दस्य वर्णे
रूढत्वात् तत्र ओमित्येतदक्षरमित्यादिश्रुतौ ओमित्येकाक्षरं ब्रह्मेति स्मृतौ च दर्शनेनापि प्रणवस्याक्षरशब्देन ग्रहणप्रसक्तेः परममिति विशेषणं प्रणव
स्य परब्रह्मत्वासंभवात् अत एव एतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमिति श्रुतिप्रसिद्धमक्षरं सर्वैकारसंग्रहस्य अक्षरशब्दितं
तद्ब्रह्मेति भावः यद्वा अक्षरशब्देन जीवः कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्य इति गीतासु तत्संधानममताक्षरं हरः क्षरात्मानावीशते देव एक इ

श्रीभगवानुवाच अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते भूतभावो
द्भवकरो विसर्गः कर्मसंज्ञितः ३ २ ३॥ रामजी॥ राम॥

ति श्रुतौ क्षरस्य परेणामृतपदेन च विशेषितस्याक्षरपदस्य जीववाचित्वदर्शनात् अमृताक्षरमित्येषु अतोऽत्राभावस्तोत्रस्यः तथाप्यक्षरं जीवाख्यं
परं ब्रह्म परममिति विशेषणान्न सोपाधिकस्य पूर्वाध्यायोक्तस्य व्यावृत्तिः नहि जीवस्य सोपाधिकस्य ब्रह्मभावः संभवत्यावरणैकोपाधेर्मायायाः परिगणाय ह्रिजासटतिकिपिहसां
तितया परमेश्वरयोगात् किं तद्ब्रह्मेति प्रश्ने परममिति विशेषणाभावेऽपि निर्धारितं तद्ब्रह्म अक्षरमिति प्रश्नस्यापेक्षितत्वे परमत्ववाचिनाक्षरपदेन ब्रह्मसो

शो २ स१

परममिति शेषः गायुमतस्तव्यमब्रह्मपिनष्ठ ह्येनक्षरस्तत्वस्य व्यपदात्तस्य किं तत्क्षरं ब्रह्मेति प्रश्नस्य परस्त्वक्षरं श्री वाक्यं तेद्वन्द्वपेतोपाधि संबंधं
सतत्क्षरं ब्रह्मेति तत्त्वमसीति महावाक्यार्थः प्रतीच्यो ब्रह्मभावः प्रतिपादितो भवतीति लघनयास्योनागंतुको भावः स्वरूपं स्वभावः शुद्धस्वरूपपदा
र्थः सोऽध्यात्मं उच्यते भाष्येतु तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वो भावः स्वभावो ध्यात्ममुच्यते अध्यात्म शब्देनाभिधीयत इति विसर्गः इत्युतो
देहो निष्क्रम्य सा गात्मको यागः स कर्मसंज्ञितः तेन विशिष्टं शिष्टेरभिमताना भावः सात्विकादिः स्वभावः उद्भवश्चतयोः करणात्मकत भावोद्भवकृ
रः तथाहि वृद्धिः कर्मानुसारि तं भावमस्य सर्पते तथा उद्भवोपि कर्मत एव समर्पितेऽग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिः
र्वृष्टेरन्नं ततः प्रजा इति ॥४ एमनीः॥ ४४

क्षरो भावो जनिमद्वस्तु कर्मफलभूतं तत् घनमूर्तं च तत् अधिभूतमित्युच्यते अधिदैवं पुरुषः सर्वोऽस्य पूर्षु शेतेऽसतीति सर्वकारणानां श्रेष्ठः सकलदेवतात्मा हिरण्यगर्भः अधियज्ञो यज्ञाभिमानी विष्णुः तेषां मीमांसोऽहमेव देहेऽस्मिन्नस्मिं देहभृतां वर ४ अत्र षट्प्रश्नानुत्तरं सुमहत्यमेतां वस्यमवद्यभावनक्तः तं ज्ञानतां प्रयाणमेव नास्तीति न तस्य प्राणान्तकालं संस्पेत्रे गम मवतीर्थे तेन ब्रह्मेव सन् ब्रह्माप्येतीति श्रुतेर्हि देहोऽपेशात् ब्रह्मपदार्थ उक्तः तज्ज्ञानस्यापि गन्तुत्वविषयत्वात् अन्तकाभावनापेक्षास्तीति न भावनाफलभूतकालेन त्यजस्यापेक्षेतेत तीयवचतुर्थयोस्तु कर्मतत्साधनफलभूतं च तत्सं वस्तु क्तस्रोऽपि न भावनापे

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽहमेवात्र देहे देहभृतां वर ४
अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५

क्षापित अंतकाले प्रबलेनैव कर्मणा चित्तस्याविरोधात्तत्साधनफलभूतस्यैव स्मरणावश्यंभावेन तत्र भावना यावेष्यच्यात्मपरिशेषात् अंतस्य योऽयं कार्यकारणब्रह्मणोः सोपाधिकनिरुपाधिकयोः स्मृतस्य भावना सहसा चेदंतकाले तस्य स्वपयोः गुरुयंभावीति तयोरमतरूपं परमात्मानं स्मरन्यः कलेवरं मुक्त्वार्चिरादिमार्गेण प्रयाति सः ब्रह्मलोकप्राप्तिद्वारा क्रमेण मद्भावं मोक्षं याति स्यात् अंतकाले वेति स्पष्टयोऽज्ञानाना स्त्यत्र संशयः इति सोपाधि

१२ प २

मो०
९०

कथमुपगो पास्तिर्भक्त्य शतैव का च तदयस्य नाधस्तासां मूर्धानमभिनिःसृतैत कातयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंतीति नु पास
कस्य गतिपूर्वकस्याम तत्वस्य ...
...स्यश्च रागात यस्तु शुद्धं तंपरार्थरूपमध्यात्मं वस्तुमात्रं वेदस्य सोब्रह्मात्मैकत्वज्ञानाभावात्तत्रनस्यप्रमाणाउक्रमणीसृतहाक्यविषयो नेभवतीति किं
तु शतैवैकाचेत्यत्र सैवविषयः नन्वत्रस्मात् पासकत्वात्कथमतिरिति चेत् नैवं हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीतिस्मार्यमतस्यो भयभ्रष्टत्वा
संभवात् कथं ब्रह्मीभूनिष्ठत्वंप्रत्यगात्मविरक्तकेवलं योगिनं मकृत्स्य शतैवैकाचिन्नाम्नानाच्चवेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शु
द्धसत्वाः ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे इति श्रुतेः निश्चितार्थानां शोधितत्वंपदार्थानां मवश्यं मुक्तिरवगम्यते न चात्र सुनिश्चितार्थो
रसनेन ब्रह्मात्मैक्यनिश्चयपर्यंतो गृह्यते तु शकाः ते षांगतस्याभावस्य प्रोक्तत्वात् नाप्युपासकाः असंभवात् उपासनाहि नाम मनस्यवस्थितं स्तद्बुद्धिः यथा नाम
यामी विष्णुबुद्धिरेवं स्वस्वविरासंतर्यामिद्वात्मबुद्धिरितिनतद्वंतः सुनिश्चितार्था इति वक्तुं शक्यं तस्मादध्यात्मविरां ब्रह्मात्मैक्यस्यानवगमात् स्वस्वनुपासके
नां संप्रसयाभावेपि अर्चिरादिगतिप्राप्तिरस्तीति सर्वमनवद्यं ॥

राम०
९०

फालेषु ३

न केवलं कार्यकारणयोरेव भावनां समप्रत्ययं दृश्यते तद्भावप्राप्तिहेतुरपितु कीटस्य वीजवत् एवं भावनाबलात् तद्भावस्तु भावप्राप्तिर्दृश्यते नहि केश्वरस्य वस्मर्यं तेस हिम हाेदे
वेभावयन्नन्ते तत्स्वरूपं देहान्तरं विनैव प्राप्त इति योगशास्त्रेपि प्रसिद्धं तत्र किमु वक्तव्यं अन्ते समप्रत्ययवशात् देहान्तरे भाव्यभावप्राप्तिरस्तीति मत्वा तमेवार्थमत्रापि दर्शयति यं यमिति तद्भाव
भाविताः भाव्याकारवासनया जनित इत्यर्थः ६ यस्मादेवं तस्मात्सर्वेषु मामनुस्मर अन्ते तत्काले स्मरणं स्मरणाम् तद्भावप्राप्त्यर्थं युध्येति चेत्कालतकर्मोपास्त्योर्भेदम् च योग्यतेज्ञान क

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं तं तमेवैति कौन्तेय सदा तद्भावभाविताः ६
तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः

मेऽसमुच्चयकर्त्तेरिव तदुभयानुष्ठानेर् एकस्मिन्नेवाधिकारिणि कर्तृत्वाकर्तृत्व प्रसक्तविरोधाभावात् मय्यर्पिते मदेकनिष्ठतां नीते मनोबुद्धी येन स मय्य
र्पितमनोबुद्धिस्त्वं असंशयं मामेवैष्यसि प्राप्स्यसि अन्ते तत्काले स्मरणेनेति शेषः ७ रामजी रामजी रामः ४४ ॥ ४४ ॥ ४४ ॥ रामः

एतदेव श्लोकत्रयेण विवृणोति अभ्यासेति अभ्यासयोगयुक्तेन तत्रैवास्थितेनायत्नेनाभ्यास इति मन्त्रितो भ्यासः तत्र ध्येयवस्तुनि चित्तस्यास्थिरेण धार्येयत्नः स च विजातीयप्रत्ययप्रवा
नन्तरितसजातीयप्रत्ययप्रवाहीकरणरूपः सोऽत्राभ्यासः तत्र भावो विषयः सिद्धः विस्मृतिमादिर्विषयात्रीत्वमस्त्रियुक्तमानमप्रतिमादिः तत्राभिहिमनसः प्रतिमाकारता
संपादनेनेति विषयभेदात् द्विगुणाय त्नः कर्तव्यो भवतीति सिद्धे चित्तसिद्धीकरणार्थ एक एव यत्नः तत्र यथा सतः स्वच्छः स्फटिकः जपाकुसुमोपरागाल्लोहितः स्फटिक
इति तत्र लौहित्याभ्यासः तस्मादल्पान्तरे स्फटिकधीप्रमोषप्रयागतत्वाभ्यासः पद्मरागपिचन्द्रिकायां इन्द्रनीलत्वाभ्यासस्तत्रैव तत्र तानिमेव किंचिद्दूरच्छिन्निहीनोपल
ताभ्यास इति उत्तरोत्तराभ्यासक्रमेण शुद्ध एक एव स्फटिकः पंचविधो भवति एवं स्वतः शुद्धे चेतनं मायोपरागात्मेश्वरः मायाभावलेनतसैवम्भरत्वाशप्रमोषेणैव वस

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ८

नो
आत्माभ्यासः स एव पित्र त्वा त्वा प्रदीप्ति उभ्यासः तत एव विरागे कदीशबुशीपादिषु आत्मत्वभ्रमः तत्र यथा घटान्तर्गतः प्रदीपः घटमात्रं भासयति घटच्छिद्रा
द्दहिर्गतः किंचित्प्रभया सर्वं विषयमवभासयति सर्वात्मना घटाद्बहिर्गतस्तु स एव सर्वं स्वतः परार्थजातं प्रकाशयति तद्वदेहान्तर्गतात्माप्रतीवत्सांनिद्धं
कं विदिष यं रूपं रूपादिकमवभासयति सर्वात्मना गुरुत्वयुक्त्या देहकृतपरिच्छेदाभिमाने सत्येतत्र परिच्छिन्नामतीकास्वं विराडात्मानमवभासयति यथोक्तं बा
त्वयं यश्च पिमणिहत्वबहुतारामो मत्स्यो स्वेपापि क्षितिविषयमपि हात्संवात्यमुद्योतयति महत्कालयस्समुद्रं घोतयेज्योतिरंतस्त्रिभुवनमपि स्फुरस्थलेभे स्कंभगोति
महत्जलयः स्वाभाविकः देहकृतपरिच्छेदाभिमानकल्पसलयमा

ताः स्थितं क्रमेण संकल्पक्रमेण सदृक्षमात्राभिनिवेशनतास्सर्वे स्वस्वाकारसंकल्पमात्रात् तथा च श्रुतिः मृत्युलोकपितृलोककामो भवति संकल्पादेवास्य पितरः स
मुत्तिष्ठन्तीति श्रुतेः हार्दनिमित्तत्वात्स्या विषयाः संकल्पकृतास्तस्य स्वपादस्वप्नाच्च दोषाः तेऽस्य कृतक्लेशमानविराजन्त्यहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक
इति शास्त्रप्रमाणपारम्पर्यानुपासकेन गृहीतो हृदयस्थः पुत्रपिवत्तुतत्रापि सपाख्यातिरूपस्तथापि परमात्माविरहाद्ग्रहीतृग्रहणग्राह्येषु यथा स्फटिके नानोपाधिवशात्तत्तद्रूपा
रंजनीलत्वयत्रस्तद्वत्तथा च स्फटिके प्रणिधीयमानं च स्फुरत्तेजोऽन्तरपलविम्बे इन्द्रनीलत्वं वाधित्वा पद्मरागत्वे तद्वाधेन लोहितस्फटिकत्वे तद्वाधेन शुक्लत्वं चावगाह
ति एवं गुरूक्तसुत्ताप्रस्वगात्मनि प्रणिधीयमानं मनो स्ववाह्येरूपमपाधस्त्रां तैरवतिष्ठते च रसं विशुद्धरूपं प्राप्य तत्स्वरूपमेव विलीयते यथोक्तं येन सज्जमितसज्जेतिय
न मनसा सज्जमिति विराराशिभावं तदपि मनः सञ्जेस्य र्थः तदेवं निर्वर्त्य हाराणेच्छ्रपामिद्धुधुविश्वस्त्रान्तमपाभिषुमनस ‹ तिरेकत्वाधपलोः ‹ आपन्तस्वस्वभूताया गसमा
धिः अपवस्त्रेवेत्रसः स्थिर्यतेन गुणायुक्तं पश्चतस्नेनानस्पामिनोस्त्र न स गापिनो नन्केधतिव समास तेन चतमाप रसमेवोत्कृष्टं पुरस्तात्त्रिरोशवदोषयत्सर्वे
पापुरस्तात्सर्वोभ्याप्तमनेन्तानन्तस्मात्पुरुष इति निर्वचनात् त्रियंघातमानं चानुचिंतयन् अहमेव भगवानस्वात्मागामुर्देवरतिसतं तदाचार्योपदेशमनुध्यायन्
तेमेव न शेषमनुद्रमापेनयाति ह्यार्थं तथा च श्रुतिः यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्पुण्यपापे विधूय परात्परं पुरुषमुपैति दि
व्यमिति परात्परं च तथाभिरां ०

भी०
११८

तदेवंउपासनायाः स्वरूपमुक्त्वाउपास्यस्य स्वरूपमाह कविमिति कविंक्रांतदर्शिनं सर्वज्ञं पुराणं चिरंतनं अनुशासितारं जगतो नियंतारं अणोः सूक्ष्मादप्याका
शादेः अणीयांसं सूक्ष्मतरं योनुस्मरेत् अचिंतयत् सर्वस्य कर्मफलस्य धातारं विभागेन प्रदातारं अचिंत्यरूपं नास्य रूपं विद्यमानमपि केनचिच्चिंतयितुं शक्यं आ

कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्वस्य
धातारमचिंत्यरूपमादित्यवर्णंतमसः परस्तात् ९ रामगीः

दित्यवर्णं आदित्यस्येव नित्यचैतन्यप्रकाशरूपो वर्णो दीप्यमानतापस्य तं आदित्यवर्णं सर्वजगदवभासकमित्यर्थः तमसः देहेंद्रियाद्यनात्मनि आत्माभिमानरूपाद्वि
द्यातः परस्तात् पराचीनं स्थितं देहाभिमानेन प्रकाशेन योगयुक्त्या सक्तेन तु तस्मिन्स्वरूपमेव प्रकाशत इत्यर्थः ९ ॥ रामगीतितोहरिः ॥ ४४ ॥ ४४

गम०
११८

उपासनायाः फलमाह प्रयाणेति प्रयाणकाले मनसाचलेन संस्कारवशान्निश्चलेन भक्त्या भगवति वा मूर्त्तिविशेष्याराध्यत्व भक्त्या युक्तो योगबलेन च योगः मनः प्राणेन्द्रियक्रियानिरोधः हृत्पुण्डरीके मनो वशीकरणमित्यर्थः तेन योगबलेन च युक्तो भूमिकाजयक्रमेण प्राणो मूलादिस्थित संस्थानं तद्धानेषु आरोहावरोहक्रमेण संचारितं पवनोत्कालेषु वा भ्रुवोर्मध्ये आज्ञाचक्रे प्राणं आवेश्य सुषुम्नानाड्या मूलाधारादुत्थापनपूर्वकं सम्यक् निवेश्य स्थापयित्वा स्थापनप्रयोजनं तु अस्मर्यविस्मरणपूर्वकं दिव्यपुरुषचिंतनं तत्र भ्रूमध्यादु पर्युत्थायमानेव योमनो मूर्छामापद्यते इति तस्मान्स्थापनं यो भवतीति स पतत्तेन संपाद्य वस्तुतो यो ... मार्गोपदेशात् मानवस्य स्थानविशेषप्रापकस्य प्राप्यस्थानस्य च तस्मिन्नेव स्मरणं कर्तव्यं तत्स्मरणात्मितमनः भ्रूमध्याद्योगिनाऊर्ध्वप्राणोत्क्रमणे अंतसमये प्राणमुत्क्रमेषु व दृढं रस्यपरंपरया प्रचलितेमतिमनो लब्धवृत्तिकं भक्तापूर्वकं

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं १० एमन्नोएमः न्नोएमा

स्कारसावल्यात्योगमाहात्म्याच्च स्थिरो पाद्युपेतं दिव्यं रादिपर्वदेवतामिरभिपूज्यमानं उत्तरं स्थानप्रसतिवाच्यमानेमानेवचैनेपुरुषेणासंगच्छमानेतेन च पथ्याभिलक्षितं स्थानं प्रापितमात्मं पश्यतितदिव्यं मुक्तेषु वामेअसम्य कृप्राणांश्चावेश्येतिसूरण्वंकत्वा योगीकविंपुराणमित्युक्तेन स्मरणांपरंपुरुषहिरण्यग भोग्यं मवेस्यभूतज्ञातस्रजनयितारं नारायणादिशं द्विप्रतिपाद्यं उपैति समीपं प्राप्नोतितत्लोकं प्राप्नोतीत्यर्थः नहिपाणिकानामिवैवदिकानां मनेबाक्षेविषय्ये लोकानां उपर्युपरिकल्पनास्तिकिंतोहिरण्यगर्भलोकाल्यस्यलोकएवांतर्भवंतिपणिहिसोपासनकर्माजितहिरण्यगर्भप्राप्येतेतिद्रष्टव्यापके
तद्धामास्रोसमस्थं १० एमन्नोएमन्नोः एमन्नोः ४४:।। ४४

गी०
१२०

९५२

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् तत्किं कृत्वा कर्तव्यं तत्कृत्वा च किं कर्तव्यमित्येतत्तद्धृद्यं वेदिष्यन्नत्र प्रतीकोक्तेन चिंत्यं प्रणवं तावद्वाच्यवाचकयोरभेदविवक्षया स्तौति यदक्षरमिति यदक्षरं प्रणवाख्यं वाच्यं वाचकं वेदविदो वदंतीति यद्वा यदक्षरं ब्रह्म तदेवार्थ एतेन तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमि त्येवं लक्षणं वा वेदविदो वदंतीति पदं च यतयो विशंति ब्रह्म प्रतीकोक्तेन शरणीकुर्वंतीति पदं क्रमसम्यग्दर्शने सति प्राप्तिरस्मायेनयत्सविशंतिपतयः यतनशीलाः स्मृतिमंतोब्रह्म चर्यं चरंतीति पदद्वयमपि समानं तत्ते पदं वर्णत्रयात्मकं पदनीयं वाख्यानं विषमो :: परमं पदं संग्रहेण प्रवक्ष्ये अत्र पंचवाच्यवाचकयोरभेदः श्रुतिश्चायमर्थ मन्येत्यत्र धर्मादन्यत्राधर्मादित्यादिधर्माधर्मातीतं ब्रह्म प्रक्रम्य सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवी

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रव
क्ष्ये ११ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां १२

म्योमित्येतदित्योंकारेणोपसंहारात् फलं च प्रतिमावत् ॐकारं प्रतीकत्वेन प्रकल्प्य तद्द्वारा शुद्धं शबलं वा ब्रह्म प्रतिपत्तव्यं तथा च श्रुतिः एतद्वै स त्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्मात् विद्वानेतेनैवायतनेनैकतरमन्वेतीत्यादिः अत्र पतन् शालग्रामवत् प्रतीकं तेन ११ भ्रुवोर्मध्ये क थं प्राणं आवेशयेदित्यत आह सर्वेति सर्वाणि चक्षुरादिविषयोपलब्धिद्वाराणि इंद्रियाणि संयम्य निरुध्य तथा हृदि मनोऽपि निरुध्य तेषां कर्मभूतं प्रा णामूर्ध्वनाड्या सुषुम्नाख्यया मूर्ध्नि भ्रुवोर्मध्ये आधाय कथं योगधारणां योगशास्त्रोक्तां धारणां मनसो देशविशेषनिबंधिनीम् आस्थितः अनुतिष्ठ

के३

मूर्ध्नि प्राणामाधाय किं कुर्यादित्यत आह ओमिति ओंकाररूपं एकाक्षरं एकं च न तद्ब्र[illegible]ं च वाचकत्वात् तद्व्याहरन्नुच्चरन्मां च ब्रह्मभूतं अनुस्मरन्यो
हि देवदत्तेत्युक्ते सत्त्वात्तन्नाम व्याहरतीति तत्सैरेव दत्तो ऽभिमुखो भवेत्सेवं ब्रह्मणो नामोच्चारणेन सन्निहितो तत्रापि कं ब्रह्म साधकस्य सन्निधीयते संनिहितं च ब्रह्म प्राणिपः
देहं त्यजन्म्रियमाणः प्रयाति तदूर्ध्वेनाध्वना याति स परमां गतिं अर्चिरादिक्रमेण ब्रह्मलोकं प्राप्य तत्रैव ब्रह्मसंपूयते एषास्य परमा गतिरेषास्य परमा संपदेषोस्य परमान
न्द इति तामेव गतिं शुद्धब्रह्मैक्यप्राप्तिं ब्रह्मलोकप्राप्तिद्वारा १३ इयं गतिरतीव सुलभेति मामाह साहमनन्येति नास्ति अन्यत्र चेतो यस्य सोऽनन्यचेता
इत्यनेन स्मरणे आदरेणोक्तः सततमिति नैरन्तर्यं यो मां स्मरति नित्यशः इति दीर्घकालं यावज्जीवं स्मरतीत्यर्थः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनामाव

ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिं १३ अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्या
हं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मनः संसिद्धिं परमां गताः १५४४:

श्यकं युक्ताहारविहारादेर्यमनियमादेश्च युक्तस्याविरहितस्य योगिनो योगमनुतिष्ठतः १४ तल्लाभेपि किं स्यादित्यत आह मामिति मामुपेत्य पुनर्जन्मेति एवाभूतं जन्मना
भुवति यज्जन्म दुःखानामालयभूतं मूलं दृष्ट्या किंचित्सुखालयत्वेपि अशाश्वतं नश्वरं तत्प्राप्नुवन्तीत्यर्थः केनाप्नुवंति महात्मानः योगेनाजितचित्तत्वात्त एव प
रमां संसिद्धिं मोक्षं गताः प्राप्ता अपि ब्रह्मभक्ता क्रमात् एव तथा ब्रह्मलोकगतानपि भक्तानस्मत्प्रपत्ते ब्रह्मणा सह ते मन्नैव प्राप्यन्ते इति संचरे परस्यान्ते कृतात्मानः प्रवि
शंति परं पदमिति संचरे ब्रह्मप्रलये परस्य चतुर्मुखस्यान्ते नाशे १५ रामजी: श्रीरामजी: ४४:॥ २ श्री २ २ २ २

मे३

तल्लाभे किं स्यादित्यत आह आब्रह्मेति आब्रह्मभुवनात् ब्रह्मलोकमभिव्याप्य ब्रह्मलोकेन सहेत्यर्थः लोकाः पुनरावर्तिनः पुनरावृत्तिस्वभावाः हेर्जुन शेषं स्पष्टं अत्रेयं व्यवस्था ये क्रममुक्तिफलाभिर्दहरादिविद्याभिर्ब्रह्मलोकं गतास्तेषां तत्रैव ज्ञानं प्राप्य ब्रह्मणा सह मुच्यंते ये तु पंचाग्निविद्यादिभिर्ब्रह्मलोकं गतास्ते अनुपासितपरमेश्वराः पुनरावर्तंत इति १६ आवृत्तिभाजां कालपरिच्छेदमाह सहस्रेति युगशब्दोत्र चतुर्युगपर्यायः चतुर्युगसहस्रं ब्रह्मणो दिनमुच्यते इति पुराणादेर्दर्शनात् सहस्रं चतुर्युगानि पर्यंतोवसानं यस्य तत् चतुर्युगसहस्रं ब्रह्मणो दिनं रात्रिरपि तावती साह रात्रिमिति अत्रापि चतुर्युगसहस्रांतां

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते १६ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः रात्रिंयुगसहस्रांतां तेहोरात्रविदो जनाः १७ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके १८

ग्प१

अंते भवतीति तां चतुर्युगसहस्रांतां ते प्रसिद्धां अहोरात्रविदो जना विदुः १७ किं ब्रह्मणोन्हि ज्ञायते किं वा रात्राविति तत्राह अव्यक्तादिति अव्यक्तं निद्रावस्थिप्रलययोः प्रकृतत्वात् अव्यक्तशब्देन अव्याकृतं विवक्षितं किं तर्हि ... तस्य आकाशादीनां सत्त्वात् किं तर्हि प्रजापतेः स्वापावस्थैवेहाव्यक्तशब्दार्थः अयं भावः प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजंगमप्रपंच सर्वोपि तदीयः ... अव्याकृतात्मना लीयते रात्र्यागमे तथा दिवसागमे पुनस्तत एव यथापूर्वमाविर्भवति एवं दृष्टिसृष्टिन्यायेनास्मत्कल्पितोप्ययं विषयादिप्रपंचो अस्मत्सुप्तौ लीयते अस्मत्प्रबोधे च यथापूर्वं भवतीति १८ ॥

कृतहानाकृताभ्यागमदोषापत्तेरेवं धर्मोक्तशास्त्रप्रवृत्तिसाफल्याय अविद्यादिवशा वशो यं भूतग्रामः स एव भूत्वा पुनः पुनः प्रलीयते तस्मादेव रागो मासन्नोर्थे
भूतग्राम इति अहरागमे भूत्वा रात्र्यागमे प्रलीयत इति योजना स एव भूत्वा प्रलीयते नान्यो भिन्नो भवतीत्यर्थः कुतः यतोऽवशः अविद्याकामकर्माधीनत्वात् सर्वो
नर्थं बीजभूतायां अविद्यायां अनुच्छेदे जन्ममरणप्रवाहविच्छेदाभावे स्वयं पतितत्वमित्यर्थः १९ एवं ब्रह्मभवनानां तानामावृत्तिं व्याख्याय यत्प्राप्तानामावृत्तिर्नास्ति तद्
क्षरं परं ब्रह्मस्वरूपं कांतं वक्तुं परस्मादिति त्रिभिः पर इति तस्मादव्यक्तात् भूतग्रामबीजभूतादविद्यालक्षणात् अन्तस्तत्त्वमोऽसंनविलक्षणो भावः सत्ता
तु शब्दात् परमितं तं सत्तासामान्यं वारयति तत्सत्तामात्मा परिणामो याकृतात्तस्य च सर्वं चानुगतत्वात् सनातनो नित्यैकरूपः उपाधिमान हि उपाधिविक्रियाप्या

भूत्वा १

भूतग्रामः स एवायं भूत्वा प्रलीयते रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे १९ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः यः स सर्वेषु भूतेषु
नश्यत्सु न विनश्यति २० अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्तन्ते तद्धाम परमं मम २१ रामजी २१ ॥

नित्यं विक्रियत इव भाति अयं तु अनुपाधित्वान्नित्यैकरूप एव यो भावः सर्वेषु भूतेषु वियदादिषु नश्यत्सु न विनश्यति केवलसत्तारूपत्वात् एतेन तस्य कालत्र
याबाध्यत्वं नित्यत्वं चोक्तं २० अव्यक्तो न व्यज्यत इति इन्द्रियत्वेन निरस्त्वं अक्षरो अच्युतं प्राप्तीति त्रिविधपरिच्छेदशून्यत्वमुक्तं तं भावं परमां गतिं ब्रह्मलोकांतां गतिं परमा
कार्यत्वात् परत्वं परमा कार्यकारणातीतत्वात् आहुः एषा स्वपुरुषा गतिरिति सांख्याः श्रुतयः यं भावं प्राप्य न निवर्तन्ते पुनः संसारे न पतंति तदिति तिविध पापे अके
वत्वं स एव मम विष्णोः परमउपाधिमस्थं धाम प्रकाशः न हि स्त्रीः परमं पदमिति श्रुतः पश्यन्ति सूरय इति सुनिष्कलंकं ब्रह्म २१ रामजी राम राम ॥ रामजी ॥ राम ४४

उपास्यो २

एवंभूतं प्राप्यस्य गतिमिन्द्रं ब्रह्मउक्त्वा तंगत्वा सर्वसामुपास्यनीयमितो मदिरस्माहपुरुष इति तु शब्दः पूर्वे वेवलक्षणयोतनार्थः हे पार्थ योयंमत्कात्मा ध्यानेन उपास्येनेति पारवतेर्कोटुश्याश्चअनन्यया [illegible] नास्त्यमोपयासां मातयो [illegible] पासककभेदमंतरेण अत्रैकस्वरूपस्वपस्थः तथाजनन्ययोलभ्यः सपरः पूर्वोक्तात्स्वा ह्वातानतुगता रक्षकरस्य कारणात्मेति पावृतलभसत्वोस्वासमात्वतमपिनस्यात्मात्वलभ्यश्चोतियस्ते [illegible] अस्यकारणात्मेवाहयस्पेतिपस्यपुरु षं स्मांत स्थानि वीजे तुमरवमवाति विपरा दीनि सच्चावरत्नंगमानि येनचरस्संसर्वंततं सामम्पुपात्तानत्वात तमभक्त्यालभ्य इति योजना २२ पूर्वोक्ता

पुरुषः सपरः पार्थ भक्त्यालभ्यस्त्वनन्यया यस्यांतस्थानि भूतानि येन सर्वमिदंततं २२ यत्रकालेत्वनावृत्तिं[मावृत्तिं] चैव योगिनां प्र यातायांतितंकालंवक्ष्यामिभरतर्षभ २३ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः २४

नामेंकार द्वारास्मगुणात्ब्रह्मविलं क्रमसुक्तिभाजांब्रह्मप्रतिपत्त्येउत्तरोमार्गो वक्तव्य इत्यत आह यत्रेति आवृत्तिमार्गोपन्यासोन्यानावृत्तिमार्गस्तु सूर्यः योगिनइति योगिनः कर्मिणश्चोच्यते तेषांयथायोग्यंमार्गद्वयविभागः शेषंस्पष्टं २३ तत्रोपासकानांदेवयानंपंथानमाहाग्निरितिअग्नि र्ज्योतिरितिवररभिमानिनी देवता लक्ष्यते एवं अहरीसहरभिमानिनी एवं शुक्लपक्षः षण्मासासंमितस्योत्तरायण रूपस्यचाभिमानिन्यो देवतेत एव एत च्चान्यासामप्युपलक्षणंतत्रप्रयाताउत्क्रांताः अब्रह्मकार्यब्रह्मसत्तत्कालपरंब्रह्मगच्छंतिब्रह्मविदोब्रह्मोपासकाजनाः २४ : रामजीरामजीः : ४४२४

एतेन धूमो रात्रिरित्येकोपि धूमादिमार्गः कर्मिणामपक्वयोगिनां च उचितफलस्याप्याख्यातः २५ उक्तौ मार्गावुपसंहरति शुक्लेति शुक्ला ज्ञानेद्भासितत्वात्
विरहितत्वात्कृष्णा धूमाद्यात्मकत्वात् गतिः एकया शुक्लया त्वन्यया कृष्णया २६ एते सृती मार्गौ जानन्नावृत्तिफले ज्ञानमार्गेण मुक्त्येति योगं प्रष्टौति
रसप्रयत्नस्य योगेन भवति कश्चन कोपि यस्मात् एवं तस्मात् सर्वेषु कालेषु २७ पुनः अयं सुखम् इदं हृद्ययोगं स्तौति वेदेष्विति वेदेषु सम्यगधीतेषु यज्ञेषु

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्तते पुनः २६ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन २७ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं २८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे स्पुरुषोत्तमयोगो नामाष्टमोध्यायः ८ ः रामनितो माः ः ॥ ६

पःसु च सम्यगनुष्ठितेषु दानेषु च सम्यग्दत्तेषु यत्पुण्यं तत्फलं चेति पुण्यफलं सर्वेषु सम्यगनुष्ठितेषु यत्प्रदिष्टं शास्त्रेषु तत्सर्वं योगी अत्येति अतिक्रामति यावत्कार्यब्रह्म
लोकं प्राप्नोति तत्र आहूय तच्छान्तं निर्विशेषं ब्रह्म स उपैति प्राप्नोति च क्रमेण सर्वथः अयं तु केनचिन्निमित्तं तदनेनाध्यायेन ध्येयतत्त्वं सदर्थ्यं व्याख्यातं अत्रिमेऽध्या
ये तत्पदं ब्रह्म व्याख्यास्यति २८ इति नीलकण्ठीये भारतभावदीपे भीष्मपर्वणि गीतार्थप्रकाशे ८मोध्यायः ८ रामजी ॥ रामः ४४ ४४

गी०
१२३

पूर्वाध्याये किं तद्ब्रह्मेत्यादिप्रश्नत्रयस्याक्षरं ब्रह्म परममित्यादिना संक्षिप्य व्याख्यानात् तत्तत्त्वस्य स्पष्टस्य कृप्रयोजनाकांक्षायां कर्मविद्यांतस्त्रिभिर्मो
तिकं धूमादिमार्गश्च व्याख्यानमित्येतन्निरूपयोगात् प्राप्यप्रापकादिविभागोक्तिरिति तेन कर्मोधिमे तेव्याख्याते तयास्त्रां तयोर्ब्रिराक्रूपात्मकसाचिरादिमार्गो
राक्रममुक्तिस्थानप्राप्तिरिति उक्तं तेन अधियज्ञाधिपुरुषौ व्याख्यातौ ॐ मित्येकाक्षरमित्यादिना अंतकाले कथं ज्ञेयोसि स्मोतव्या व्याख्यातं तत्र स्वधर्मप्रश्नवि
यामं गानि रूपितापि शिष्मांघं जेपञ्चसविषयं प्रश्नद्वयं किं तद्ब्रह्म किमध्यात्ममिति तदिदानीं व्याख्यायतनवमे ध्यापश्चात्तस्मे तेन केवलं त्रिविधाशिगतिप्रास्या

श्रीभगवानुवाच इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानं विज्ञानसहि
तं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १ श्रीरामजीरामजीमननमननमः देवीजी:

पुटे २

कालांतरे एव मुक्तिरस्ति किं त्विहैव सद्यो मुक्तिरस्तीति विशेषं वक्तुं श्रीभगवानुवाच इदं तु ते इति इदं ब्रह्म मा रागं तु पूर्वस्मात् अध्यायात् विलक्षणं ज्ञानं पुते
तु शब्दं गुह्यतमम् अतिगोप्यं प्रवक्ष्यामि अनसूयवे अस्या गुणेषु दोषाविष्करणं तद्रहिताय ज्ञानं तस्मिमात्रं वदं पं ब्रह्म विज्ञानेन अनुभवेन सहितं न तु केवलं शा
ब्दं यज्ज्ञात्वा यत्ज्ञानं ज्ञात्वा साक्षात्कृत्य अशुभात् संसारात् मोक्ष्यसे अत्र अपरं समर्थ रोतज्ञानं तं हेसंविज्ञानमिरंवस्याप्यशेषतः इति प्रतिज्ञातं पश्चविज्ञाना
प शास्त्वा चं द्रुमा पेनो पलस्वर्णाभूतं जगत्कार्यं ब्रह्म तत्र विनिरूपितं पहितानं धिकारसं पतंथं तस्य वसगुणस्यो पासनमुक्तं तदिदं सर्वशेषिभूतं ब्रह्म एवं क्त
यमिति तस्यैव प्रतिज्ञानीतवचनमात्रेण नापरक्तं ज्ञानं ज्ञायत इति तत्र तत्र गम्यसारितं न प्रसक्तं तं १

एतत्सर्वस्मादितिरन्तर्विद्येति विद्यानां राजा राजविद्या अध्यात्मविद्या गुह्यानां राजा राजगुह्यं राजदन्तादिषु परनिपातः पवित्रं पावनं उत्तमं सर्वोत्कृष्ट
मितरां शास्त्रेषु हेतुतां प्रायश्चित्तादिषु पापेषु अक्षयं प्रत्यक्षं निमापीयं रूपं प्रत्यगात्मवस्तु तत्स्वयमेवात्मनावगम्यते नैतेन प्रत्यक्षावगमं प्रसन्नेन सुखादिवदनायासेन
तिराश्रमिन् श्रेविज्ञानं सहितं धर्मीति विशेषणात्प्रत्यक्षावगमं तत्स्थत्वात्कोऽपि नतु दोषः तर्हि अपूर्वत्वाभावात्फलं ससारतत्वाह धर्मोऽपि हिंतत्वा हि कर्तुं मायामपि

६९

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् २
अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ३

सर्वात्माकारहेतोर्मां साक्षात्पश्यते ज्ञानमेकं कर्तुं शतमपवर्गः स ससारस्य फलं तद्वाप्नोतीति तर्हि हेतुः साध्यं साक्षात्सामस्तुं कर्तुमिष्टानि कर्तुं सुकरमपि तं अपि च
कर्तुं समस्तं अनायासं साध्ये असंतापन यमाचरेत् सिद्धत्वात् तर्हि आशु विनाशि फलं चेत् अस्य पुण्यवस्तु मात्रविषयत्वात् अनन्तफलं न तु कामफलवत् नश्यति २ तर्हि
कृतपतत ज्ञानं सर्वे न संपादयन्तीत्याह अश्रद्दधाना इति स्पष्टार्थः श्लोकः ३

एवंस्तुतमभिमुखीकृत्य पक्ष्यमाणं तत्राह मयेति मयाइदंसर्वं जगत्ततं व्याप्तं कुपा नाम ता तकल्पके नेव कुंडलादीनि नत्रुभागे वितत्वं तत्रप्रसंस्न वेयमजगतः प्रभवः प्रलयस्त
थेति तथा चाजनविधिस्यादिस्मृतिः सहेतुनेयवक्तृता तस्मात तत्कम विशेषाभावादितिचेत तत्राह भूमः पश्चापतो वादिमानि भूतानि ज्ञायंतेयं नज्ञातानि जीवंति यत्प्रयंत्यभिसं
विशंति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतिरपि समज्ञसगोलस्परां ज्ञाजन्मादि हेतुं स्म तस्यानुगमं त्रयमारिशाद्धे विभुविरारिषुरंशयतिस्म ताछे वत खिमानि भूतानि जायंते मारा

तत्३ १ इति १

मयाततमिदं सर्वं जगदव्यक्तमूर्तिना मत्स्थानि सर्वभूतानि
न चाहं तेष्ववस्थितः ४ श्रीरामजी हरीजी रामजी

प२

ध्रेविस्यादिनात स्मुनिर्णाय वाक्यं तुश्चानं दाछ्वे वस्खलिमा निभूतानि ज्ञायंत इतीमेषा मार्गेवीविविधाति तैत्रेर्विधायाः पर्यवसानाभिधानात एवमिहापि मत्तमेभूमि
रापानलो वायुः सादिनामसर्वभूतात्मकुमावि राजो जगत्तन्मादि हेतुत्वं प्रदर्श्यप श्चादहं सर्वस्य जगतः प्रभवः प्रलयस्तथ सूत्रे नमा पामेबुलेपितत्वं दर्शयेद
दानीं शुद्धप्रपंचगात्मं प्रवत दर्शयति तच्छु स्वंधतीत्यायेन प्रतिपत्तिमाकर्षार्थमिति गाम्मराजविधसादि नास्तु तत्वाज्ञयथाकश्चिद्दुर्लेच्छाप्रमंस्थतीति हि शेषपुस्त
त्समीपमात्रांसस्थूलांतारा प्रत्यक्षधतीति ग्राहयति प्र ॥ ४८ ॥

तिपद्यते चानेनैव क्रमेण प्रतिपत्ता एवमिहापि कार्यकारणप्रतिपत्तिद्वारा अकार्यकारणस्य शुद्धस्य प्रतिपत्तिर्भवति अतएव भगवानप्य
कारेण मया ततमिदं सर्वमित्यत्र मयाममेयः परो भावस्तेन ततं व्याप्तमिति आचष्टे अनन्तमहिमा वेद्यस्य जगतः प्रभव इत्यत्र मम मेयः परो भावः स मम
जगतः प्रभव इति स च भगवतः कारणात्मनः परो भावः परमानंद एव तेनैवेदं ततं व्याप्तं नेराध्येयेव मृदा लस्य भृतेस्तस्यैव जगदुपादानत्वेन त
दीयसत्तास्फूर्तिभ्यां जगतो व्याप्तत्वात् अत एवाव्यक्तमूर्तिनेति विशेषणं मायाशवलं हि कारणं बुद्धिगोचरत्वात्कारणगोचरः शुद्धं हि बु
द्धेः परत्वात् अकारणगोचर इति किंभूतात्कारणात् नेरः न परिणामरूपत्वेनाह मत्स्थानीति मयि स्वगाने स्रग्ज्ञानं सर्पदंशभावस्य इव
सर्वे भूतानि कल्पितानि न चातो मत्स्थानीत्युपचारादुच्यते अधिष्ठानाध्यस्तयोर्योस्तवसंबंधाभावात् एतदेवाह न चाहं तेष्ववस्थित इति न चाहं परमानंदस्व
रूपो भूतेष्ववस्थितोऽस्मि यदाराविव मनः तत्र परिणामित्वात्स्व ४॥ ४४ ॥ ॥ ॥ ॥ ॥ ४४

एवमस्मुपगतं त्वयाः तं स्वस्वरूपमा[illegible]दि[illegible]शिष्टं न तं तत्स्वरूपं परिवृत्तिर्न च मत्स्थानि भूतानीति श्रयंभावः अस्मादेतं स्वरूपं स्पृष्टा स्थानकरणांत्रं तान[illegible]न्तरुपाश्रितस्तं वृक्षकारणमुच्यतः इति वा तिकोक्तमज्ञानमेव जगत्कारणं तच्च तत्रैव स्वहेतु चासंगतः तत्स्थमुक्तमेव तत्कार्येणामूर्तं सर्वैर्न तन्मम मामं गमस्य आधारधेयभावसंबंधो ऽग्निर्नित्ये च नो यो व्याप्ति आहतं तद्धि स्वकारि कर्मणि निक्षु नीयेन मयीत्विनामसंबंधः तेभ्यः न तु सर्व राः नाहं तत्स्वात्मस्थस्वातं तत्संबंधशून्यस्वरूपेति न च मत्स्थानि भूतानि युक्तमिति तन्नु भाषिणस्तव व प्रसंगोपुवाससर्वैश्च तिप्रतीतस्य भूतसंबंधानुभावात्कथं न च मत्स्थानीत्युक्तिरिसाशंकाह्य पश्य मे योगमैश्वरमिति मम भूतेः सर्वयोगयुक्तिघटनां पश्य ईश्वरं मायाविना निर्मितं गगने गंधर्वनगरं वा तत्रायमर्थ[illegible] ममात्मा प्रसंगानंदः भूतभृत् न भूतस्थो न च कारणं व्यर्थमिति क्रम स्वप्नमिव गंधर्वनगरमभूरपि तत्संबंधस्य कारणापरिणामात्संभवात्तएवं सर्वोपिपसनं दक्षोपि मम आत्मा भूतभावनः भूतानां वृद्धिकरः एवमेवाना

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५ः ११

रस्यानि भूतानि मात्रामुपजीवतिकोह्येवान्यात्कः प्राण्यात्ययेष्यआकाशोनंद स्यादित्यादिस्मृतिभ्यः आकाशोत्रव्याकृतात्मा स्वधिष्ठानभूतश्चानंदः अनुसूतान स्यात् तत्रहि प्राणापानक्रियां कश्चिदपि न कुर्यात् तत्कारणात्तेनात्मयं कारणापि स्यात् आकाश आनंदानुबंधे तु कारणस्य चेतनत्वात्कार्यं मम पिचेतनावत्स्यादिति श्रुत्यर्थः बृहदारण्यकेपि पृष्टे गार्गि विषयस्य वाकूर्ध्वयथ्यापरं तत एद्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चे साच त्तानेत्र आकाश एव तदोतं च प्रोतं चेति मायाविनिर्मर्वस्यां तत्र तत्तस्मिन्नुक्ते आकाशस्मिन्नु खल्वाकाश आतश्च प्रोतश्चेत्यस्यां तत्संगतामिन वाक्षरं गार्गि आकाश आत्मेव तत्स्थलादि लक्षणस्यान्तरस्माकाशाधारत्वमुक्तं तस्माद्युक्तमुक्तमाकाशशरीरभावता कारणोपाधिनिकृष्टब्रह्मात्राभिप्रायेण ममात्मा भूतभावन इति ५

श्लो ३

आकाशरूपोक्तेऽर्थे दृष्टान्तमाह यथेति यथा लोके आकाशे स्थितो नित्यं सम्बद्धो वायुः सर्वत्र परिमाणतश्च महान् तथा सर्वाणि भूतानि सर्वगते मयि आकाशकल्पे असंश्लेषेणैव स्थितानीत्येवमुप
धारयेत्यर्थः किं तद्ब्रह्मेति प्रश्नस्योत्तरमुक्तं अक्षरं परमं ब्रह्मेति अक्षरमंत्रः शब्दः तत्पदार्थस्य निरुपाधिकत्वं ब्रह्मसु तत्र निरुपाधिकत्वं ब्रह्म अक्षरदृष्टान्तेन व्याख्यातं इदानीं तस्याक्षरा
त्मनो जीवेनाभेदं सदृष्टान्तपूर्वकमाह यथेति वायुः सूत्रात्मा वायुरेव तमस्तत्सूत्रमिति श्रुतेः सर्वत्रग इति समष्टिलिङ्गात्मत्वात् सर्वगतत्वं महत्त्वमिति बाल्यवायुत्वात् तस्य यथा आका
शस्थितः अव्याकृताकाशस्य कारणे स्थितः नित्यमिति कालत्रयेऽपि तस्याकाशसंबन्ध उक्तः सर्वाणि भूतानि उपाधिविशिष्टत्वंपदार्थरूपा चेतनवर्गाः तद्वत्त्वं लोकाभि

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ६ सर्वभूतानि कौन्तेय प्र
कृतिं यान्ति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ७ श्रीभगवानुवाच ७ श्लो ७ ॥ ॥

प्रायेणायथाकार्यसंबन्ध उक्तः प्राकृतेन शादृश्यं मध्ये च स्वकारणे एवाभेदेन तिष्ठन्त्येवं सर्वेऽपि जीववर्गा उपाधौ सत्ते प्राकृतत्वानाशादृश्यमेव यथा काशो महाकाशादिव
परस्माद्ब्रह्मणः कालत्रयेऽपि नातिरिच्यत इत्यर्थः एतेन जीवब्रह्माभेदकथनेन तत्त्वमसि बोधात् समुच्यत इति पराणेतां ब्रह्मैव जीव इति तद्विहतं ६ नन्वेवं उपाधिरहितस्यैव ब्र
ह्मणि लय एवं तु पाधेः का गतिरित्याशंक्याह सर्वेति सर्वाणि भूतानि स्थावरजंगमशरीराणि कौन्तेय मम मायात्मिकां प्रकृतिं त्रिगुणात्मिकां अपरां स्वभूम्याद्यात्मिकां यान्ति प्रवि
शन्ति कल्पक्षये पुनस्तानि भूतानि भूतानि मत्कार्याणि संस्काराणि तानि कल्पादौ विसृजामि विविधं सृजामि अहंकारणात्मा मा
यावी ७ ॥ श्लोः ४४
मिकानि ३

एतेस्वाहंप्रकृतिमितिस्वमविद्याल्पणांस्वांप्रकृतिंअवष्टभ्य आश्रित्यतांविनाकेवलस्यंभूत्वासंभवात्इमंभूतग्रामंपुनः पुनर्विसृजामि किंभूतंप्रकृतेर्वशात्स्वभाववशा
त्अवशंरागद्वेषाद्यधीनं ८ ननुविषमांसृष्टिंकुर्वतस्तवैषम्यनैर्घृण्यंप्रसज्यतेत्यताह नचेतितानिविषमसृष्टिरूपाणिकर्माणितिमांनिबध्नंतितत्रहेतुः उदासीनवत्आसीनमि
तियथापर्जन्योनबीजविशेषेषुरागंद्वेषंवाकृत्वाउदासीनः सन्वर्षति एवमीश्वरोपिपुण्यपापरागंप्राणिषुद्वेषंवाकुर्वन्सृजति तत्तद्भाग्यकर्मबीजवशात्ते
विभिन्नंफलंप्राप्नुवंतीतिनिश्चयस्यैवबन्धशोरसर्थः ९ ननुविसृजामिउदासीनमितिपरस्परविरुद्धमुच्यतइत्याशंक्याह मयेतिमयाकूटस्थेनअध्यक्षेणअपस्कांतक

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ नच मां तानि कर्माणि निबध्नंति धनंजय उदासी
नवदासीनमसक्तं तेषु कर्मसु ९ मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते १० अवजानंति मां मूढा मा
नुषीं तनुमाश्रितं परं भावमजानंतो मम भूतमहेश्वरं ११ श्रीरामजी

लितनमयूतकेनप्रकृतिः सचराचरंजगतसूयतेउत्पादयतिअनेनअध्यक्षत्वेनहेतुनाहेकौंतेय जगद्विपरिवर्ततेजन्माद्यवस्थासुभ्रमति अपस्कांतवदुदासीनस्य
सृष्टिप्रवर्तकत्वमभवामीतिभावः तथाचमंत्रवर्णः एकोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्माकर्माध्यक्षः सर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणा
श्चेतिएवंपरमेश्वरस्यमर्मोध्यक्षत्वंमानुषत्वं प्रतिपादयति १० एवंभूतंमांसंतंमूढाः अवजानंतिपतितामानुषींआश्रितंमनुष्यदेहेनव्यवहरंतंमपरेश्वरत्वेनवंतरं अ
साधवः भूतानांमहेश्वरंमामवजानंतीतिसंबंधः ११ रामजी

मूढत्वानाह मोघाशा इति मोघाशाः व्यर्थैव आशा आशिषो येषां ते मोघाशाः तथा मोघकर्माणः निष्फलयोगाः मोघज्ञानाः निष्फलज्ञानाः यतो विचेतसः निर्विवेकाः यतो राक्षसीं आ-
सुरीं च रजस्तमःप्रधानां मोहिनीं मोहकरीं प्रकृतिं श्रिताः छिंधि भिंधि पिब खाद परस्वमपहरेत्येवंशीलाः क्रूरकर्माणो भवंतीत्यर्थः तथा ये महात्मानः अत्र सुकृतिनः तु पूर्वो-
क्तेभ्यः ते विलक्षणाः मां भजंति परो दैवीं प्रकृतिं सत्वप्रधानां आश्रिताः अनन्यमनसः एकाग्रचेतसो मां किं गतासु [illegible] ातिकातयाऽभेनवा भजंति न किं तर्हि मां भूता-
दिं सर्वभूतकारणं अव्ययं मत्वा ज्ञात्वा भजंति १३ भजनप्रकारमाह सततमिति यतंतः इंद्रियोपसंहारं शमदमादिषु प्रयतमनाः दृढान्यहिंसादीनि व्रतानि एवं

मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः १२ महात्मानस्तुमांपार्थदैवींप्रकृतिमा-
श्रिताः भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं १३ सततंकीर्तयंतोमांयतंतश्चदृढव्रताः नमस्यंतश्चमांभक्त्यानित्ययुक्ताउपासते
१४ ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखं १५ १५ १५ रामजी:॥ रामजी:

तेन दृढव्रताः नमस्यंतश्च मां तदेव ऐश्वर्यं प्रतिमादिरूपं वा भक्त्या नित्ययुक्ताः नित्यं समवहिताः संत उपासते [illegible] संतः एको-
[illegible] संत उपासते १४ ज्ञानयज्ञेन निर्विकल्पसमाधिना पातंजलाः एकत्वेन अहमेव भगवान्वासुदेव इत्यभेदेनो-
पनिषदः पृथक्त्वेन अयमीश्वरो मम स्वामीति बुध्या भक्ताः अन्ये पुनर्बहुधा बहुप्रकारं विश्वतोमुखं सर्वं हरिः यत्किंचिद्दृष्टं तद्भगवत्स्वरूपमेव यच्छ्रुतं तन्नाम
च यदुक्तं भुक्तं वा तत्सर्वमपि तवैवेत्येवं विश्वतोमुखं यथा स्यात्तथा मां उपासते १५

ऽहमेवोपासनं विदधाति अहमिति । क्रतुः संकल्पो देवताध्यानरूपः यज्ञः श्रौतं स्मार्तं अथ देवतोद्देशेन द्रव्यत्यागः स्वधा पितृणां मंत्रे औषधं मनुष्याणां मंत्रं मंत्रो येन दीयते स आज्यं हविः अग्निः हुतं प्रक्षेपक्रिया इदं सर्वं यस्मादहमेवातस्त्वा विश्वतोमुखं उपासनं युक्ततरमित्यर्थः १६ धातः कर्मफलानां कर्ता वेद्यं वेदितव्यं ब्रह्म पवित्रं पावनं तपश्चारिकं १७ गतिर्मुक्तप्राप्यं स्थानं भर्ता कर्मफलदानेन पोषकः प्रभुः अंतर्यामी साक्षी कृताकृतावेक्षकः । निवसंत्यस्मिन्निति निवासः आश्रयो यत्र

यज्ञः १

धाता १

अहंक्रतुरहंयज्ञः स्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहंहुतं १६ पिताहमस्यजगतोमातापितामहः वेद्यंपवित्रमोंकारऋक्सामयजुरेवच १७ गतिर्भर्ताप्रभुःसाक्षीनिवासःशरणंसुहृत् प्रभवःप्रलयस्थानंनिधानंबीजमव्ययं १८ तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिच अमृतंचैवमृत्युश्चसदसच्चाहमर्जुन १९ रामजीरामजीः रामजीरामजीरामः रामजीरामः॥ रामः

प्रानादिः शरणं रक्षकः सुहृत् उपकारं अनपेक्ष्य उपकर्ता प्रभवः उत्पत्तिस्थानं प्रलयस्थानं स्थानं स्थितिस्थानं निधानं कर्मफलसमर्पणस्थानं कालांतरे फलसमर्पणबीजं प्ररोहकारणं प्ररोहधर्मिणां अव्ययं यावत्संसारभावित्वात् १८ अहं तपामि आदित्यो भूत्वा अहं वर्षं वृष्टिः तां निगृह्णामि उत्सृष्टमासेषु केष्विदिति अमृतं जीवनं मृत्युर्मरणं च सत् तद्वाच्यं वा सत् साधु असत् असाधु एतत्सर्वं अहमेव अतस्तं विश्वतोमुखं मम भजनं कुर्वंतं मद्रूपेणाहं अनुग्रहं करोमीति भावः १९

ये पुनरुक्तेषु प्रकारेषु अन्यतमेनापि मां न भजन्ते ते केवलं कर्मठाः कां गतिं प्राप्नुवन्तीत्यत आह त्रैविद्या इति तिस्रः ऋग्यजुःसामरूपा विद्या येषां ते त्रैविद्याः
[illegible] तएव त्रैविद्याः सोमपाः सोमपायिनो याज्ञिकाः यज्ञैर्मामिष्ट्वा स्वर्गतिं फलं प्रार्थयन्ते इत्यात्मप्राकृतान् संकल्पमात्रोपनतानस्तु स्वसंभिन्नान २० त्रयी
वेदत्रयी तस्यामुक्तं धर्मं त्रयीधर्मं काम्ययज्ञं प्रकामाः विषयकामुकाः गतागतं यातायातं लभन्ते तथा च श्रुतिः प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं
येषु कर्म एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्तीति अष्टादश षोडश ऋत्विजः यजमानः पत्नी चेति २१ एवं कामिणा निष्फलं च काम्यं अन्ते भक्तानाम

त्रैविद्यामांसोमपाः पूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयन्ते तेपुण्यमासाद्यसुरेन्द्रलोकमश्नन्तिदिव्यान्दिविदेवभोगान २० तेतंभु
क्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशन्ति एवंत्रयीधर्ममनुप्रपन्नागतागतंकामकामालभन्ते २१ अनन्याश्चिन्तयन्तोमांये
जनाः पर्युपासते तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं २२ येप्यन्यदेवताभक्तायजन्तेश्रद्धयान्विताः तेपिमामेवकौन्तेययजन्त्य
विधिपूर्वकं २३ एमजीएमः

पि मद्भजनेनैव सर्वसिद्धिरित्याह अनन्या इति नास्ति अन्यत् उपास्यो येषां अहमेव भगवान्वासुदेवइत्यभेदेन चिन्तयन्तस्तमर्थं ये जनाः पर्युपासते परितः साक
ल्येन कात्स्न्येनोद्धतं च श्रेयसर्थं उपासते तेषां नित्याभियुक्तानां सततमभियोगिनां योगः अप्राप्तस्य प्राप्तिः योगभूमिकाया वा प्राप्तं क्षेमः तत्स्य च भाव सम्पर्कक्षा
तत्त्वं यं अहमेव वहामिनि वहामितस्माघर्थं वायोग भूमिपूर्वो ध्येमिलामार्थं वा चिन्तानकृ [illegible] तेष्वेसर्थः अनन्यचेतेषाम हमित्यलावैमे

नसं १

स्वं तेऽसर्थ्यं तथा चोक्तं ज्ञानी त्वात्मैव मे मतमिति अविधिपू
र्वकं विधिरभेदबुद्धिस्तद्रहितं सा हि विभिन्नपूर्वकत्वं तत्र हेयं यजनीयम् २३

मे २

भी०
१२८

हि यतः सर्वयज्ञानामहमेव सर्वदेवतारूपेण भोक्ता प्रभुः फलदाता च एवं स्थितं मामप्रस्वामिनं तत्त्वेन यथार्थेन न जानंति अतश्च्यवंति ते तानि निष्कामलब्धामंसारा-
ते पतंतीति २४ सर्वभक्ताः यथा भजनेन प्राप्नुवंति स्वाराध्यसांनिध्यमित्याह यांतीति भूतार्थ्यमिज्यापेषां ते भूतेज्याः २५ मद्भक्तिरतिसुकरा देवतांतरभक्तिस्तु दुःखवित्त-
व्यया यामसाध्येत्याशयेनाह पत्रमिति भक्त्यैव केवलं समर्पितं स्मिता नान्यैरिति भावः भक्त्युपहृतं भक्त्या समर्पितं २६ अतः सर्वमेव मदर्पणं कुर्वित्याह यत्करो-
षि गामना रिकं तद्भगवत एव प्रसंस्कारादिकं करोमीति तत्र तील सर्थं मे वतदर्पणं कुर्विति एवं वचनादिर्थपि नामकीर्तनादिहृष्य्याउत्यं २७ एवं कुर्वतः फलमाह शु-

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते २४ यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः भूतानि
यांति भूतेज्या यांति मद्याजिनोऽपि मां २५ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः २६ यत्क-
रोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं २७ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः संन्यासयो-
गयुक्तात्मा विमुक्तो मामुपैष्यसि २८

प १

भाशुभेति शुभाशुभफलैः इष्टानिष्टफलैः कर्मरूपैर्बंधनैः एवं कुर्वन्त्वं मोक्ष्यसे मदर्पणबुद्ध्या यत्किंचित्कर्म कुर्वतः कर्मलेपो नास्तीत्यर्थः अयमेवोक्त-
लक्षणः कर्मफलसंन्यासरूपो योगः तत्र युक्तात्मा सहितचित्तः सन् विमुक्तः कर्मबंधैर्विमुक्तः सन् मां सर्वेषां प्रत्यगात्मानं उपैष्यसि २८ ॥ रामजी राम ॥
श्रीतरामजीरात्मरामजीरामः ॥ रामकमः ॥ रामजीरामजीः

राम०
१२८

युक्तो भक्तानेवानुगृह्णाति नेतरानित्यतो रागद्वेषवान्भगवानित्यत आह समोहमिति यथाग्निः रागादिशून्योपि समीपस्थानामेव शीतं नाशयति न दूरस्थानां तद्वत्सर्वेषु सम
मोप्यहं शरणागतानामेव बंधनाशयनामेवाप्यभिसर्थः अतो न मम रागोद्वेषोवेति भावः मयितेतेषु चाप्यहं भक्त्या अनन्यशरणा तथा मय्येव वर्तंते अहमपि तेषु वर्ते
अभक्तचित्तानां रागाद्याक्रांततेन तत्र मम विशेषतोपि व्यक्तिर्नास्तीति भावः २९ भक्तेर्माहात्म्यमाह अपिचेदिति असंतपापिष्ठोपि मां यद्यनन्यचेताः सन् भजते तद
थापि स साधुरेव मंतव्यः हि यतः सम्यग्व्यवसितः सम्यगुद्यतः ३० सम्यग्व्यवसिततया स क्षिप्रं शीघ्रं धर्मात्मा भवति शांतिं च [illegible] शाश्वत निगच्छति प्राप्नोति हे कौं

निगच्छति २

समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं २९ अपि चेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव
स मंतव्यः सम्यग्व्यवसितो हि सः ३० क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ३१ मां हि पार्थ व्यपा
श्रित्य येपि स्युः पापयोनयः स्त्रि[illegible]यो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं ३२ किं पुनर्ब्राह्मणाः
पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ३३ रामजी रामजी रामजी रामजीः॥ रामजी रामजी रामजीः

तेय त्वमेवमस्याः प्रतिज्ञां प्रतिजानीहि प्रतिज्ञां कुरु मे मम भागवतो हि मे भक्तो न नश्यतीति ३१ किं च हे पार्थ हि निश्चितं मां व्यपाश्रित्य येपि संतः पापयोनयः स्त्रादयो
पि परां गतिं यांति ३२ ब्राह्मणादयः पुनः पुण्याः मदाश्रयेण परां गतिं यांतीति तत्र किं चित्रं अतस्त्वमीदृशं सुलोकं अनित्यं नश्वरं असुखं सुखरहितं लेशहीनं प्राप्य मां परमा
नंदभजस्व लोकांतरं भजनेन भविष्यतीत्यर्थः तथा च श्रुतिः इहैवेदं दर्शथम सम्यक्तिनेच देवस्य महती विनष्टिरिति ३३ रामजी रामजी : ॥ ४४ : ॥ ४४ : ॥४

८१

मी० १२७

भगवत्प्रकारं दर्शयति मन्मना इति मय्येव मनो यस्य न पुत्रादौ स मन्मनाः मय्येव भक्तो न राजादौ धनाद्यर्थं स मद्भक्तः मद्याजी मदर्थमेव यजते न स्वर्गाद्यर्थं स मद्याजी तादृ
शो भव मामेव नमस्कुरु शरणं व्रज न त्वमात एवमनेन प्रकारेण युक्त्वा योगं कृत्वा मामेवात्मानं सर्वांतरं एष्यसि प्राप्स्यसि अभेदेन घटाकाश इव महाकाशं यततो मत्प
रायणः अहमेव सर्वोपाधिशून्यश्चिदात्मा परं सर्वोत्कृष्टं अयनं प्राप्यं यस्य स मत्परायणः तथा च श्रुतिः यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा
विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ३४ इति नीलकंठीये भारतभावदीपे भीष्मपर्वणि गीतासु नवमोऽध्यायार्थप्रकाशः सप्तमे तत्त्वंपदवाच्यौ निरू
पितौ तदुपासनाच क्रममुक्तिरिष्टे मेप्रोक्ता नवमे तत्सरलप्राप्त्यर्थं उक्तस्तत्र मोक्षविघ्नतां मुख्यं सर्वत्र भगवद्दर्शनमुक्तं तद्गतद्वेष कल्मषितमनसामशक्यमिति मत्वा तोभ

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ३४ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योग
शास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः श्रीभगवानुवाच भूय एव महाबाहो शृणु मे परमं वचः य
त्तेहं प्रीयमाणाय वक्ष्यामि हितकाम्यया १

गवांस्तत्सिद्ध्यै स्वविभूतीः कैश्चिद्विदेवपरार्थे पुमाव हृदि द्विधानार्थास्ताबदुपदिशति दशमेतत्फलभूत विघ्नतामुख्यस्योपासनं तेन च विश्वरूपदर्शनमेकादशे
पुनस्तत्सरलत्वस्यावक्तेस्योपासनं तदुपासकलक्षणानि चोक्ता उपासनाकारं तत्सरार्थशोधनार्थं समापयिष्यति तत्र वा तत्मात्स्वयमेव श्रीभगवानुवाच भूय एव
ति हे महाबाहो भूयः प्रागुक्तमपि पुनः मे परमं निरतिशयवस्तुनः प्रकाशकं वचः प्रीयमाणाय अमृतपानादिव मद्वचनात्प्रीतिमनुभवति वक्ष्यामि हितकाम्यया
तवहितेच्छया रामजी रामजी

राम० १२७

ति२

दुर्ज्ञेयत्वाच्च मत्स्वरूपस्याहं त्वां ब्रवीमीत्याह नमेविदुरिति प्रभवं प्रकृष्टं भवं ऐश्वर्यं विपत्तिरस्थितिसामर्थ्यं न विदुः तत्र हेतुः अहमिति अयं भावः देहोत्पन्नं तर्हि देवादीनां
बुद्ध्यादिलाभः न वा ग्वाचीनैर्बुद्ध्यादिभिः प्रोसिद्धकालीनो स्यार्थः परिच्छेत्तुं शक्य इत्यर्थः ॥२॥ कस्तर्हि त्वां वेत्ति सत्कृत्याह य इति यः असंमूढः समर्गवेतिस
एवं च सर्वपापैः प्रमुच्यत इति संबंधः जन्मजन्मपरितुष्टात्मनो ह्येकोऽभावेनश्रमोत्पाद्यामललक्षणेन मूढः संमूढः तद्विपरीतोऽसंमूढः तत्त्वज्ञानेन बाधिताध्यासः सर्वा
त्मविलातैरस्मज्जनिम नु भवन मांसगात्मानं लोकमहेश्वरं अनादिः कारणं तद्रूपं अतएवाजं अजातं वेत्ति सः सर्वैः कृतैः क्रियमाणैर्वा पापैः प्रमुच्यते मर्त्येषु
इत्य१

नमेविदुः सुरगणाः प्रभवंनमहर्षयः अहमादिर्हिदेवानांमहर्षीणांचसर्वशः २ योमामजमनादिंचवेत्तिलोकमहेश्वरं असंमूढःसमर्त्ये
षुसर्वपापैः प्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहः क्षमासत्यंदमः शमः सुखंदुःखं भवोभावोभयंचाभयमेवच ४॥ रामजीरामरामराजा॥

मध्ये ३ सर्वमहेश्वरत्वादेव मत्तो बुद्ध्यादयो भवंतीत्याह बुद्धिरिति बुद्धिः अंतःकरणस्य सूक्ष्मार्थावबोधने सामर्थ्यं ज्ञानं आत्मानात्मादिपदार्थावबोधः असं
मोहः प्रत्युपस्थितेषु बोद्धव्येषु अव्याकुलतया विवेकपूर्विका प्रवृत्तिः क्षमा आक्रुष्टस्य ताडितस्य वा अविकृतचित्तता सत्यं प्रमाणेनावगतस्यार्थस्य यथार्थत्वेन भाषणं
दमो बाह्येंद्रियनिग्रहः शमो मनोनिग्रहः सुखं आह्लादः दुःखं संतापः भवः उत्पत्तिः भावः सत्ता अभावः तद्विपर्ययः भयं त्रासः अभयमेव च तद्विपरीतं ४॥
रामजीः ॥ रामः४४:॥४४

अहिंसाप्राणिनामपीडासमतामित्रामित्रादिसमचित्ततातुष्टिः संतोषः लब्धेपर्याप्तबुद्धिः तपइन्द्रियसंयमपूर्वकंशरीरपीडनं दानंयथाशक्तिसंविभागः य
शोधर्मनिमित्ताकीर्तिः अयशोऽधर्मनिमित्ताऽकीर्तिः एतेबुद्ध्यादयोविंशतिभावाः मत्तएवप्राणिनांभवंतिपृथग्विधाः प्रत्येकंनानाप्रकाराः तत्तत्कर्मानुरूपेणमा
यास्मदेवतत्पर्यशरणानुसारेणइतिभावः ५ एतच्चशिष्यद्वारासहसर्गप्रवृत्तिमहर्षयइतिसप्तभृग्वादयः चत्वारः सनकादयस्पूर्वप्रसिद्धाः महर्षयइतिसंबंध
तथामनवश्चतुर्दशप्रसिद्धाः तेमेवमानसाः हिरण्यगर्भरूपस्यममभनसएवोद्भूताः अयोनिजाः जाताउत्पन्नाइमाः चतुर्विधाः अयंलोकस्थितेराधारभूताः

अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः भवंतिभावाभूतानांमत्तएवपृथग्विधाः ५ महर्षयः सप्तपूर्वेचत्वारोमनवस्तथा मद्भावा
मानसाजातायेषांलोकइमाःप्रजाः ६ एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः सोविकंपेनयोगेनयुज्यतेनात्रसंशयः ७ रामजीः ४४

तदुभयंयेषांपत्नीसंबंधि [illegible] येषांसंततिरित्यर्थः यद्वायेषामितिषष्ठीपंचम्यर्थेयेभ्यइमाः प्रजाः अयंलोकस्यजातादिसर्थः तेपिमद्भावाः मत्प्रभा
वामनोयेषांतेप्रसिद्धमहिमानोऽप्येतेपतोममैवोपासतेः तस्त्वमपिमामुपास्वेतिभावः ६ आत्माविधिकारिणमाह एतामितिएतांवक्ष्यमाणांविभूति
योगंचविभूतिनामुखभगवतिमनः समाधानंयस्तत्त्वतोवेत्तिसम्यगनुष्ठातृत्वातुसममयोभवतिमः अविकंपेनअचलेननिर्विकल्पकेनषष्ठाध्यायोक्तेन
मदिष्येणसमाधिनायुज्यतेनतस्यकृतकृत्योभवतिनात्रसंशयइतिपृच्छतिशपार्थोऽयुज्यतेभगवद्वक्तमितिसंशयासंभवात् ७

उपासनास्वरूपमाह अहमिति अहमिति बुधाः मां प्रत्यगात्मानं इति मत्वा भजंते इति कथं अहमेव सर्वस्य जगतः प्रभव उत्पत्तिः मत्तः मत्तु यदहं प्राप्यैव सर्वं बुध्या
दिकं सत्सत्कार्यं प्रवर्त्तते अहमेव तस्मात् कर्ता तर्यामीति वा अहं ग्रहणात्मानं उपासमीति भावः भावसमन्विताः भावनायुक्ताः एतच्चोत्तरार्थः ८ एवं ध्यानेन भाव
नाप्रकारमुक्ता अनुध्यानेन मा अस्मच्चित्ता इति अहमेव चित्ते येषां ते मच्चित्ताः तथा अहमेव गतो विद्यमानो येषु ते मद्गतास्तथाविधाः प्राणा इंद्रियाणि येषां ते मद्गतप्रा

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते इति मत्वा भजंते मां बुधा भावसमन्विताः ८ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं कथयंतश्च
मां नित्यं तुष्यंति च रमंति च ९ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामु एमङ्गीः एमङ्गीएमुः ८८

पयान्ति ते १०।१०:

णाः चित्तेनेंद्रियैर्वा यत्तत्सर्वं प्रत्यगात्मा वासुदेव इति भावयंत इत्यर्थः इममेवार्थं परस्परं बोधयंतः श्रुतियुक्तिप्रदर्शनेन मम माहात्म्यमुद्बोधयंतः ज्ञापयंतः
कथयंतश्च शिष्येभ्यः तुष्यंति तेनैव वक्तानेनैव न तु मिष्टान्नादिना रमंति च तेनैव न तु स्त्र्यादिनेत्यर्थः ९ उपासनायाः फलमाह तेषामिति सततयुक्ता
नां नित्यं सावहितानां प्रीतिः प्रेमा तत्पूर्वकं भजतां सेवमानानां तेभ्यो ददामि तं बुद्धियोगं ज्ञानरूपं समाधिज्ञाननिष्ठामित्यर्थः तं ददामि येन पयानिष्ठया ते मा
मुपयांति मम हृदिमिव न घोरे न प्रविशंति १०

किंचेतेषांभक्तानुमुपर्यनुकंपार्थेनस्वप्रयोजनमित्यर्थः राजवत्तद्बुद्धिस्थानेनअज्ञानजंअविवेकाउत्थितंमिथ्याप्रत्ययलक्षणंमोहांधकारंतमोनामकंसंसारंनिवर्त्यनिरा
स्तंमूलाज्ञाननाशेननाशयामिआत्मभावस्थः आत्मनोभावोंतःकरणाशयस्तत्रैवस्थितःज्ञानरूपेणभास्वताप्रबलेनअयंभावः तत्त्वमसीतिवाक्यजन्यब्रह्माकारांतःक
रणवृत्तिः सोत्सत्ते श्रवणमननध्याननिदिध्यासनादिनिकर्माणिचापेक्षते यथादीपस्तोयसत्ये तैलवर्त्यादिनिवृत्तस्त्वज्ञाननाशेन स्वविषयप्रकाशनार्थंप्रश्र
यावृत्तितत्क्षणात्प्रसंस्थानंचकर्मभिरूपकर्तुं नापेक्षते नहिज्ञानेतदाकाश्यसपादहिवाकर्मापेक्षावार्तातानरामुपोपेक्ष्यते प्रमाणत्वात्मात्रमापेक्षसा

तेषामेवानुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थो ज्ञानदीपेनभास्वता ११ अर्जुनउवाच परंब्रह्मपरंधामपवि
त्रंपरमंभवान् पुरुषंशाश्वतंदिव्यमादिदेवमजंविभुं १२ आहुस्त्वामृषयः सर्वेदेवर्षिर्नारदस्तथा असितोदेवलोव्यासः स्वयंचैवब्रवी
षिमे १३॥

ज्ञानस्यतत्प्रेउत्पन्नज्ञानानामपिमत्संख्यानेपेक्षांकर्मभिरूपकारापेक्षांचवरंतितेवलादेवमोक्षस्यकृतकृत्यमनिसतांचप्रार्थयंतइतिरिक्तं ११ एतां
विभूतियोगंश्रुत्वाऽनिर्दिनाविभूतिज्ञानस्यफलात् एकेश्रुत्वातत्त्वात्सुकृतः प्रथमंस्तुस्वाभगवंतमार्जेनपश्चात्तेनउवाच परमितिपरंब्रह्मत्वत्परमुपास्यंतरेवब्र
ह्मत्वंविद्धि तेरेपरिरमुपासतइतिश्रुतेःपरंधामज्योतिः नत्वंरंहस्तितत्पंज्ञानंतस्यधीहिंहिमीसेतस्त्वंचमनएवेतिश्रुतेर्हिज्ञिरूपत्वात्परमंपवित्रंनेतातोयादिदेव
परमंभवानंतन्मानमाहत्पुरुषमितिसोदिनपुरुषंदेहांतस्थंशाश्वतंनित्यंदिव्यंदिविहार्दाकाशेप्राविर्भूतंआदिभूतंआदिदेवंसर्वज्ञात्मनोप्याद्यंअजतएवअजंवि
भुंव्यापकंतांऋषयआहुरितिसंबंधः १२

व्यक्तिप्रभवं १४ हे भूतभावन भूतानां भावक १५ एवं स्तुत्वात्मनो बुभुत्सितमाह वक्तुमिति १६ कथमिति योगो ऐश्वर्यं तद्वन्तं हे योगिन् त्वां कथं च मे चक्षुषा विद्यां नकथ
मपीति विश्वरूपदर्शनेऽप्येदोलमभवान् कतिपयेषु वस्त्वेषु भाववेंः विस्तरेण प्यामिक्ष्वरूपदर्शनेऽधिकारमिच्छन्निमिमाशयेनाह वक्ष्यिति १७ प्रोगैश्वर्यरू
पं विभूतिं ध्यानालंबनं अमृतं अमृतसमो रसमास्वादनं १८ अत्रोत्तरं श्रीभगवानुवाच हंततेहंतत इदानींहंतेत्यनुमतौ विह्याः पुराणांतेरम्बपिवथ्रष्टत्वेनप्रमि

सर्वमेतदृतं मन्ये यन्मां वदसि केशव नहि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भू
तेश देवदेव जगत्पते १५ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि १६ कथं
विद्यामहं योगिंस्त्वां सदा परिचिंतयन् केषु केषु च भावेषु चिंत्योऽसि भगवन्मया १७ विस्तरेणात्मनो योगं विभूतिं च जनार्दन भूयः कथय तृ
प्तिर्हि शृण्वतो नास्ति मेऽमृतं १८ श्रीभगवानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे

द्याः विभूतयस्ताः कथयामीति या उत्तमा प्राधान्यतः इति प्राणोपकारित्वेन विभूतयः इह प्राधान्येन या अस्तु मं उक्ते परेणैवोक्तेति तस्माच्च वक्ष्यमाणास्त्विति भावः
अमथायो योगं विभूतिं च कथयेति पृष्टे विभूतिमात्रकथनेन अनवहितचित्तत्वं भगवतः स्यात् न अस्त्यंतो विस्तरस्य मे विभूतीनामिति विपरिणामेनानुषंजनीयं ॥

भी०
१२२

स्या २

संक्षेपेणयोगमाह अहमिति हेगुडाकेश हे जितनिद्र हे घनकेशेति वा अयं वा सर्वस्यात्मा अततीसात्मा व्यापकः अतएवसर्वेषांभूतानामाशयः एकीभावस्थानंजलानामिवकासारोजलाशयस्तद्वदहंसर्वभूताशयः स्थितः अचलः शर्परेखविवविसर्गलोपोवक्तव्यइतिवार्तिकेनपक्षेविसर्गलोपः भाष्येतुसर्वेषांभूतानामाशये तद्देशेस्थितइति सर्वभूताशयतास्वंअहं आदिः जन्मकारणंमध्यंस्थितिकारणंभूतानामंतः लयकारणंसंमयमिदं अस्तांअभ्यवास्तोतिभावः २० योगमुक्ताविभूतीराह आदित्यानामिसादित्यायावरः आयसमाप्तिः आदित्यानांद्वादशानांमध्येविष्णुनामाआदित्योहं वामनावतारोवास्मीतिषामआरो

स१

अहमात्मागुडाकेशसर्वभूताशयस्थित अहमादिश्चमध्यंचभूतानामंतएवच २० आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी २१ वेदानांसामवेदोस्मिदेवानामस्मिवासवः इन्द्रियाणांमनश्चास्मिभूतानामस्मिचेतना २२ रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्षसां वसूनांपावकश्चास्मिमेरुः शिखरिणामहं २३ ॥ रामजी: ४४ : ॥ रामजी: ॥ : : :

स१

नामधेयोरविः अंशुमानअसंतंप्रतपनशीलोनिरायमध्यान्हेतीव्रतापवान्रविरहमेवेसर्थः मरुतांसप्तसप्तकानांमध्येमरीचिरहं नक्षत्राणांताराणां अत्र प्रायेणनिर्धारणेषष्ठी भूतानामस्मिचेतनेत्यादौसंबंधेपि शशीचंद्रमाः २१ सामवेदोगानेनरमणीयत्वात् वासवोदेवराजत्वात् अत्रमनइंद्रियाणां प्रवर्तकत्वात् चेतनाधीवृत्तिश्चिदभिव्यक्तिहेतुत्वात् एतेवेदादीनांमध्येश्रेष्ठाः २२ रुद्राणामेकादशानां वसूनामष्टानां शिखराणि तद्विशेषास्तद्वतां मध्येमेरुरहंमाद्रिरहम् २३

पुरोधसां पुरोहितानां बृहस्पतिर्देवराजपुरोहितत्वात् सेनानीनां सेनापतीनां स्कंदः कार्तिकेयः सरसां जलाशयानां २४ एकं अक्षरं ओंकाराख्यं जपयज्ञोऽस्मि शुभ
ज्ञात स्थावराणां स्थितिमतां २५ २६ अमृतोद्भवं अमृतमथनावसरे उद्भवायसमं २७ प्रजनोपसजनहेतुः कंदर्पः कामः ननुहृयोमेथुनहेतुः २८ नागानां

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसामस्मि सागरः २४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः २५ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेंद्राणां नराणां च नराधिपं २७ आयुधानामहं वज्रं धेनूनामस्मि कामधुक् प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः २८ अनंतश्चास्मि नागानां वरुणो यादसामहं पितॄणामर्यमा चास्मि यमः संयमतामहं २९ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणां ३० पवनः पवतामस्मि रामः शस्त्रभृतामहं झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१

पीतामवातस्मेदानां यादसां जलचराणां संयमतां नियमनं कुर्वतां २९ कालयतां गणनं कुर्वतां ३० पवतां पावयितॄणां वेगवतां वा रामो दाशरथिः रामादीनां
परमेश्वराणामपि विभूतिमध्ये गणनं ध्यानार्थं झषाणां मत्स्यादीनां मकरो जातिभेदः स्रोतसां सरितां ३१ रामजी॥ रामजीरामः ४४ : ॥ :॥

न१

भी०
१३३

सर्गं ३ मा २

सर्गाणांमितिकार्याणांभूतानामादिरंतश्चेतिप्रागेवोक्तत्वात्विद्यानांचतुःषष्टिसंख्यानांमध्येअध्यात्मविद्याअंधेरहंहेतुत्वात्प्रवदतांप्रवक्तॄणांसंबंधिनोरागद्वेषाभिप्रायेणकथा
वादजल्पवितंडारूपाःएतेतेषांमध्येवादस्तत्त्वनिर्णयार्थत्वादहं ३२ अक्षराणांमध्ये अंअकारः अकारोवैसर्वावागितिश्रुतेः सामासिकस्यसमाससमूहस्यमध्ये
द्वंद्वोस्मिउभयपदार्थप्रधानत्वादितिभावः समासएकार्थीभावोविवक्षितोवागुरुशिष्याणांवाप्रत्यर्थंकथाथवाएकत्रावस्थानंतत्रोविवक्षितमर्थंज्ञातंसमासिकंचातुर्थिक
र्थकोसमकरीतोकोस्त्यः यस्मिंतिचसलोपः तस्यमध्येद्वंद्वोरहस्योथो हंद्वंद्वहस्येतिसिद्धंद्वंद्वरहस्यवादितं शास्त्रिकप्रसिद्धंअक्षयः क्षयहीनःकालःक्षणा

प२ दी

सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन अध्यात्मविद्याविद्यानांवादःप्रवदतामहं ३२ अक्षराणामकारोस्मिद्वंद्वःसामासिकस्यच अ
हमेवाक्षयःकालोधाताहंविश्वतोमुखः ३३ मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्यतां कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा ३४
बृहत्सामतथासाम्नांगायत्रीछंदसामहं मासानांमार्गशीर्षोहमृतूनांकुसुमाकरः ३५ रामनीः रामनी ः १३४ः ः ः ः ः

र्ष्या१

दिःपरोवाईश्वरःकालस्यापिकालोस्मिधाताकर्मफलप्रदः विश्वतोमुखः सर्वंपश्यतीतिसर्वसाक्षीत्यर्थः ३३ सर्वहरःप्रलयकारीकोस्मरस्मिभविष्यतांभा
विकल्याणानांउद्भवऐश्वर्योत्कर्षोहंकीर्त्यादिसप्तकमहंयासांप्रत्ययमात्रेणमनुष्येषुकृतार्थताश्लाघ्यताबुद्धिर्भवति ३४ बृहत्सामत्वामिद्धिहवामहइत्यस्या
मृच्युत्पन्नंबृहत्सामाख्यं विगीयमानंसामपृष्ठस्तोत्रेविनियुक्तंइंद्रस्यसंतत्साम्नांमध्येहमस्मिछंदसांमध्येगायत्रीद्विजत्वसंपादनात्सोमाहरणाच्चश्रेष्ठोह
मस्मिकुसुमाकरोवसंतः ३५

रामं०
१३३

अथवसायो निश्चयस्तद्योगी वा ३६ वृष्णीनां यादवानां उशना शुक्रः ३७ दमयतां दमनं साधनं दण्डोऽस्मि जिगीषतां जेतुमिच्छतां जयसाधनं नीतिरस्मि मौनं वाचो निग्र
हः ३८ सर्वभूतानां बीजमस्मि सेनन सर्वभूतानि मद्विभूतिरिति दर्शितं तदेवोपपादयति न तदस्तीति मया विनाभूतं किमपि नास्ति उपादेयस्य उपदेयमंते रागास्थित मम
भवाति ३९ नांतोऽस्तीति उद्देशतः एकदेशेन विभूतेर्विस्तरो मया प्रोक्तः ४० सर्वभूतानां बीजमहमस्मि उक्ता सर्वभावात्म्योक्तेः सर्वस्य विभूतिरित्युक्तमेव तथापि तद्गुह

सत्त्व

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहं ३६ वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः मुनीनामप्यहं
व्यासः कवीनामुशना कविः ३७ दंडो दमयतामस्मि नीतिरस्मि जिगीषतां मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ३८ यच्चापि सर्वभूतानां बीजं तदहमर्
जुन न तदस्ति विना यत्स्यान्मया भूतं चराचरं ३९ नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप प्रोक्तो विभूतेर्विस्तरो मया ४० यद्यद्विभूतिमत्सत्त्वं
श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं ४१ रामजी:

एषतूद्देशतः २

ण्णाशक्तं भतिप्राह्य यदिति यद्यत्सत्त्वं प्राणि विभूतिमत् ऐश्वर्ययुक्तं श्रीलक्ष्मीः शोभा वा तद्युक्तं ऊर्जितं बलाद्यतिशययुक्तं तत्तत्सर्वं मम तेजसः चिदंशस्यांशं
भवं अंशात्संभूतमवगच्छ जानीहि लोके यद्रतिरमणीयं तद्भगवतो रूपमिति आर्याः स्मृतेः ४१ : रामजी रामजी:॥ ४४ :

गी०
१३४

वि१ स ऽस्य१

उक्तमधिकारिगणमुद्दिश्याह अथवेति मूढानां सेतदुक्तं तत्पुनः तावदेवैतदिदं एकदेशेनाहमिदं विश्वं व्याप्य स्थितोस्मि पादो [illegible] भूतानीति श्रुतेः तस्मात्सीरि स्थितं तदंश

मेतत्कामसर्वं त्रयब्रह्मबुद्धिमेव कुर्वित्याशयः ४२ इति नीलकंठीये भारतभावदीपे भीष्मपर्वणि गीतासु दशमोध्यायः अथ प्रकाशः पूर्वस्मिन्नध्याये योगो विभूतिश्चाध्यायि

पेर्भगवता तदुक्तानां विभूतिं योगं च मम यो वेत्ति तिस्रात्मनि योगं विभूतिं च जनार्दन भूयः कथयेति तेन प्रार्थितेन तत्र अहमात्मा गुडाकेश सर्वभूताशयस्थि

त इति सं रूपेणायोगो भवतः सर्वभूताधारत्वलक्षणः उक्तः [illegible] मा विभूतिकथनात्तदेतच्च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ४२ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या

यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोध्यायः अर्जुन उवाच मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं

वचस्तेन मोहोयं विगतो मम १ रामजी॥

प१

इति कृत्स्नेन धाम्नि मयि समेये संज्ञगाह विष्टभ्य स्थितं त्वामेव स्मारितः तदेव भगवतः सर्वभूताधारत्वं साक्षात्कर्तुकामोर्जुन उवाच [illegible] मदनुग्रहायेति मयि यत्

नुग्रहो नुकंपा तदर्थं मदनुग्रहाय परमं सर्वः शोकमोहनिवर्त्तकत्वेन उत्कृष्टं गुह्यं गोप्यं अध्यात्मसंज्ञितं आत्मानात्मविवेकार्थं शास्त्रं अध्यात्मं तत्

तितं यत्तया चत्र अशोच्यानन्वशोचस्त्वं इत्यादिना षष्ठाध्यायपर्यंतं संपदार्थशोधनप्रधानं नायं हंति न हन्यते इत्यात्मनि। कर्तृत्वाभावो [illegible] लप्रतिपादकं तेन मममोहः

अविवेकोयं विशेषेणागतो नष्टः अत्र प्रथमे पादे स्वराधिक्यमार्षं १

राम०
१३४

भवेति सप्तममध्यायमारभ्य दशमपर्यन्तं त्वया भूतानां भवाप्ययावपि त्वत्तो अहं सर्वस्य जगतः प्रभवः सर्वं प्रवर्तत इति तावपि मया विस्तरशः श्रुतौ हे कमलपत्राक्ष त्व
त्तः अपि माहात्म्यमपि न च मां तानि कर्माणि निबध्नन्तीति विषमसृष्टिकर्तृत्वेपि वैषम्यनैर्घृण्ये रागद्वेषौ नास्ति जगत्कर्तृत्वेपि किं कार्यं बन्धो नास्तीत्येवमादिरूपं तत्सर्वं यथार्थं श्रुतमिदानीं अकृताम
व्ययं २ एवमिति पञ्चभिर्विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति त्वात्मानं जगदाधारमाह तदपि तथ्यमेव नैमात्रात्सम्भावनास्ति हे परमेश्वर ते त
व रूपं ऐश्वरं ईश्वरस्येदं विश्वात्मकं मायामयमित्यर्थः हे पुरुषोत्तम द्रष्टुमिच्छामीति तद्विश्वरूपं मायामयं वास्तवं तत्रूपं मा यातीति मिथ्येश्वरमिति पुरुषोत्तमेति च पदा

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छामि
ते रूपमैश्वरं पुरुषोत्तम ३ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ४ रामजी रामजी :: ॥ ४४ ॥ :

भ्यां लभ्यते तथा च वक्ष्यति मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसीति उक्तं च शुद्धं रूपमभिप्रेत्य अव्यक्तो
ऽयमचिन्त्योऽयमिति ३ मन्यस इति हे योगेश्वर योगानां योगिनामीश्वर तद्रूपं यदि मया द्रष्टुं शक्यमिति मन्यसे परिमितदर्शनाधिकारं पश्यसि तर्हि दर्शय तद्धि
मम संभ्रमयं मायामयं त्वात्मानं दर्शय मां प्रत्यादेवास्याव्ययं मायायां हि सर्वं सर्वात्मकं सर्वदास्तीति प्रसिद्धं पश्चात्कर्तव्यमिति हि न वर्तमानमतीतं च भविष्यत्स्य
लमागवपि यथा ह्युरमहेरं च निमेषः कल्पस्यापि चिरात्मने स्थितानि से पश्य मायाविजृम्भितं न हि भ्रमदृष्टीति विमर्शमीक्ष्यमशः पश्यतीत्यतो मायामयत्वात्सम्य
ऐश्वरस्य रूपस्याव्ययत्वं ४